शास्त्रदीपिकाप्रथमाध्यायद्वितीय तृतीयपादौ

पत्र ४२

॥ श्रीगणेशाय नमः ॥ श्रीगुरवे नमः ॥ आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते। अथातो धर्मजि
ज्ञासेत्यत्र प्रमाणस्वरूपसाधनफलैः साङ्गो धर्मो जिज्ञास्यत्वेन प्रतिज्ञातः तस्मिन्नध्याये प्रमाणं निरूप्यते किं प्रमाणं
धर्म इति। तेन यद्येव किंचिद्धर्मप्रमाणनिरूपणमर्थवादमन्त्रस्मृतिनामधेयादि गोचरं तत्सर्वमत्रैव सङ्गतं। न च चो
दना प्रामाण्यसाधनं लक्षणार्थो येन स्मृत्यादेः सङ्गतिः स्यात्। किं तर्हि धर्मप्रमाणनिरूपणं। तदुक्तं भाष्यकारे
ण। को धर्मः कथंलक्षण इति सर्वस्मिन्नध्याये तदेव कियत इति समस्तमध्यायी प्रमाणलक्षणमस्य लक्षणं
तद् इति तेन लक्षणसंगतिः प्रावत् सिद्धा। अतः तत्संगतिरपि चोदनानां प्रामाण्ये पदपदार्थसंबन्धोत्पत्ति
कत्वेन वाक्यार्थप्रतीतेर्मूलत्वं तथा चोपपादितं। अनन्तराधिकरणे वेदद्वारेण तासां पौरुषेयत्वमाशङ्कि
तं। यथा कौशाम्बकारेण। सन्निकृष्टकाला वेदा इदानींतनाः स्वैर्याचोदनाः सम्पाद्याः पौरुषेयाश्च वेदा असं
शयं पौरुषेयाश्चोदना इत्येव माशङ्क्य वेदापौरुषेयतया तदवयवानां चोदनानामपौरुषेयतया प्राम
ण्यं प्रतिपादितं एवं चोदनानां वेदावयवानां प्रामाण्ये साधिते तदवयवत्वेनोपस्थितानां मर्थवादादीनां
नामप्यपौरुषेयत्वसामान्याच्चोदनावत् प्रसक्तं प्रामाण्यमस्ति न वेति विचारयति। तदिदमुक्तं। सिद्धप्रमा
णभावस्य धर्मे वेदस्य सर्वशः। विध्यर्थवादमन्त्राणामुपयोगो विधुनोच्यते। अस्यार्थः। सिद्धप्रमाण
भावे चोदनानां वेदत्वे धर्मविभज्य किं तावन्मात्रस्यैव प्रामाण्यमुत सकलस्येति विचार्यते। न विधेरेव

इति र   ५

किंत्वर्थवादमंत्राणां सर्वेषामेव सर्वशः सर्वप्रकारं विधिश्रुतिस्मृतिनिर्धर्मप्रतीतावुपयोगः प्रतिपाद्यत इति।
यच्चोदनार्थमपकर्षे पौरुषेयत्वेन समं तस्य प्रामाण्यं सिद्धमायमपि [illegible] ग्रन्थकर्त्रा [illegible]भावमाश्रित्य स्थिरीक्रि
यते। विध्यर्थवादमंत्राणामिति। नायमर्थो विधेरप्रकपयोग इति प्रतिपाद्यत इति किं तर्हि विध्यादीनां सर्वेषामुप
योगोऽस्ति न विधेरेवेति प्रतिपाद्यत इति। नामधेयानि [illegible] अर्थवादमंत्रयोर्वा श्रुतिस्मृति
त्यामुपयोगः कथ्यते। अथवा विधेरपि [illegible] सामान्ये सिद्धमुपयोगित्वं साक्षाद्विधानेन विशेषतः [illegible] साधि
तं भवतीत्यभिप्रायः। औदुंबराधिकरणे वा [illegible] प्रयोगः प्रतिपाद्यत इत्यभिप्रायः। अत्रास्मिन्नेव सूत्रे
विध्यतिरिक्तानां सर्वेषां आनर्थक्यं पूर्वपक्षी क्रियते पश्चात्तु क्रमेणैव कृत्वा [illegible] सिद्धान्तः [illegible]
थममर्थवादे [illegible]व सिद्धांतकथनान्तानेवोद्देश्य [illegible] वायुर्वै क्षेपिष्ठा देवतेत्येवमादीनि यानि विधि
भावनात्तदेशत्रयातिरिक्तार्थानि तानि किं धर्मे प्रमाणमुतनेति संशयः। तदर्थं विचार[illegible] किं वि
धकदेशे नैषामेकवाक्यमुत भिन्नवाक्यतेति। तत्सिद्ध्यर्थमप्यनर्हितनीयं किं विधकदेशार्थवादयोः पर
स्पराकांक्षा नेति संशयः। तत्रैवं पूर्वपक्षः। अर्थवादा निराकांक्षाः भूतार्थप्रतिपादनात्। विधकदेशश्च स
मर्प्यते विशिष्टार्थविधानतः। यथाश्रुति गृहीतानि तानि [illegible] तैर्वाभूतमर्थमप्याचक्षते न धर्मा

सिद्धांतेऽस्त्वाधाप्यविधिवशादेकार्थत्वतया भवितव्यमित्येतावत्साधारणेनाभिधास्यते। ६

धर्मौ। नवाध्याहारादिभिरुक्तप्रतिपादनमपरिसूर्योषु स्वत्वध्याहारः। सौपूर्णा नियेलानिं सएवैनं तूतीं
गमयतीति विशिष्टार्थप्रतिपादनात्। अर्थान्तराकांक्षानावात्। अनाकांक्षत्वाद्देव न सन्निहितेनापि वाय
व्यं श्वेतमालभेतेत्यनेनैकवाक्यतां विशिष्टार्थप्रतिपादनमेव पदानां कार्यमवधारितं न प्रयोजनव
दर्थप्रतिपादनं येन तद्भिस्सया विध्येकवाक्यता कल्प्येत। आख्यायिकारूपाणां बहूनामुपलक्षोलो
के स्वाध्यायविधिवशाद्वेदस्य कृत्स्नस्य प्रयोजनवदर्थपर्यवसानमिति चेत्। दृष्टार्थत्वेनानुसन्धेय।
नतद्दृशोनार्थकत्वं नान्तरवद्दृष्टार्थताध्ययनस्या। तन्नतावदर्थवादानामाकांक्षा। नापि विध्यकदेर
स्यात स्यापि विशिष्टभावना विधानेन निराकांक्षत्वात्। नच प्रवर्तनाय प्राशस्त्यापेक्षा विधितएवान
पेक्षात्। तत्समीहितसाधनत्वावगमेन प्रवृत्तिसिद्धेः। नाचार्थवादैः प्राशस्त्यं प्रतिपाद्यतेऽस्तार्थे
माचप्रतिपादनात्। लक्षणया हि तेन्यः प्राशस्त्यं गम्येत। नच श्रोतार्थसंभवे लक्षणायुक्ता। एकवाक्यतया
यलक्षणा स्यात्। नचतत्र स्वीप्रमाणमस्ति। तस्मादप्रमाणाः एवं मंत्रनामधेययोरपि दर्शयितव्यं नान्या
लु२ मपि धर्मप्रमितौ दृयात्। तस्मादेषामप्रामाण्यं। तेनमसमस्तोवेदः प्रमाणमित्यवधारणा सिध्यती
ति अत्रोच्यते। विधिना ह्येकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः। स्वाध्यायविधिनावेदः पुरुषार्थावि २

नीयते। सर्वस्तूनार्थवादानां शास्त्रस्येन प्रमाणता। स्वाध्यायाध्ययनविधिना दृष्टार्थत्वात् सकलस्य प्रयो
जनवदर्थपर्यवसाने बोधितेः। अर्थवादानां च स्तुतार्थप्रतिपादनेन प्रयोजनानवाहेर्यकेन लक्ष्यमाणाः
प्रदेवलासाध्यं कर्म क्षिप्रमेव फलं दास्यतीति शास्त्रस्य रूपेऽर्थः। सोऽनन्तरप्रवृत्तविधकदृष्टाकांक्षित्वा
आकांक्षां शक्नोति हरयितुमिति गम्यते। स्वाध्यायविधिरेव प्रयोजनवदर्थपर्यवसानं बोधयितुं शा
शास्त्रपरतया विनातदनुपपत्तेः स्तातार्थमेषांगमयतितास्य याज्ञलक्षणा सिद्धिः। ततश्चैकवाक्यत्वं। यत्तु दृ
ष्टार्थः स्वाध्यायविधिनानुसर्तव्यो मतः ह्रशोनार्थकल्पने स्फकौ तत्र सत्यं लाक्षणिकोर्थो दृष्ट एव दृ
ष्टत एव हि श्रौतार्थपरेण तत् सैवं पर्यन्तो प्रत्ययः। संभवति तु श्रौतपरत्वे तात्पर्याभावान्न लक्षणा
गीक्रियते। अतश्च स्वाध्यायविधिनार्थवादस्यापि पुरुषार्थपर्यवसानबोधनात् परं परयापि दृष्टफले
स्वर्गादिकल्पनानुपपत्तेः स्तुतार्थमात्रस्याप्रयोजनत्वात् शास्त्रस्य परं वैलक्षण्यांगीक्रियते। तद्धि पुरुषप्रव
र्तनाय विधिरपेक्षते। यत्तु स्वयमेव विधिः समीहितसाधनताबोधयन्नं लमेवानपेक्षः प्रवर्त्तयितुमित्यक्तौ।
तत्रोच्यते। सत्यं विधिरेव प्रधानं प्रवृत्तिकारणं तस्यैवानुग्राहिका। शास्त्रस्यावगतिः। फलं निसर्गसुंदरे स्वयमेव लि
प्सानवतीति तत्साधने दुःखाकरे स्वतः शावतः द्वेषः यो वर्त्तितुं साधने प्रवर्त्तमानस्य तत्रैव स्तुत्यान्नवितव्यं। हि तत्सा

हि२

नन्वेवमगतेपिप्रयोजनं लभ्यते न तत्प्रामाण्यं ।७ प्रामाण्यंस्य अवगतो हेमन्त्राणामपि ८ कीर्त्तनेदेवर

प्रेनावगति रपि तत्रैक रुचिं जनयतीति प्रवृत्ति हेतुः स्यात् नान्यथा साच पुरुषेष्वस्य प्रमादालस्यादियुक्तेष्वकर्मदुः
खात्मकेरोचकरोचयती गुणकथनमपेक्षते। अवगतमीहितसाधनत्वमपि कर्मरुचि गोचरी कृतं लाभसती गुणानी
रोचलेशा नरामिति सर्वजनीनमेतत्। तदेवं विधिना मध्यमनवि धिवशेनैव दृष्टे पुरुषप्रवर्तने प्रवर्तमानानां रुचि
करत्वात् तद्वदेवार्थवादानामपि सिद्धं प्रामाण्यं। एवं मंत्राणामपि व्याख्या यदि विधिवशादेव प्रयोजनवत्त्वावगमाद्वि
धिसंन्योत्सु द्वितीयेनिराकरणात् प्रकरणादिवशेन प्रधानी नकृतानां दृष्टमदृष्टं वा प्रयोजनं कल्प्यत इति ना
त्रमर्थे बोधपरत्व प्रधानवाक्यस्यार्थे मंत्राणामपि प्रयोजनवत्त्वे प्रामाण्यमसीत्येतावत्सिद्धं। प्रयोजनविशेषस्तु
प्रस्कृतमथवादाधिकरणे समाप्त्यप्त्वा ह्यक्ष्यते। तथा नामधेयस्यापीति। सिद्धं सकलस्य वेदस्य प्रामाण्यं। ॥वि
विधिसाद्दत्तता वादमात्रे त्वनर्थकी। सर्वो कार्ये यौगि विदमारभ्यते। यदुक्तानानर्थक्यमर्थवादानामिति। त
दनुगक्रमः। क्रत्वर्थविंदुकेषु चिन्तयामहे। यथो दुम्बरो यूपो भवति ऊर्ग्वा उदुम्बर ऊर्क्पशव ऊर्जैवास्मा ऊर्जंप
शुनाप्नोत्यूर्जोवरुध्या इत्येवमादिषु विधि संभवादि रेव माक्षिप्यते। तत्रैवं विचार्यते विधिमौदुम्बरो यूपो भ
वतीत्योदुम्बरतायास्तु ऊर्जोवरुध्याइति फलमुत सर्वोयमर्थवाद इति। तदेवमेव वाक्यीयकेन विधिविभक्ति रहिते

न साधनत्वमौदुंबरतादीनां शक्यते प्रतिपादयितुं तु तेनेति तत्र पूर्वः पक्षः। ऊर्जं पशूनाप्नोति ऊर्जोऽवरुध्या इत्यनेन पशूर्
ज्या साध्यत्वं गम्यते श्रुत्या लक्षणया हि श्रावणत्वात्। फलविधौ चार्थवत्त्वमानर्थक्यमर्थवादत्वे। साध्यस्य तु साधनापे
क्षितत्वात् तत्संनिधिश्रुत्या चोदितमौदुंबरत्वमसत्यपि विधौ साधनत्वेनावगम्यते। साधनत्वावगमादेव प्रवृत्तिसिद्धेर्ना
र्थो विधिनेति। ॥ सिद्धान्तस्तु। विधावसति भावनाया औदुंबरत्वपनाष्ठिताया: सेव्या स्याद्यन फलं। सन्निहितावसा
विप्रकृष्टं फलं अतोऽपि न फलसंबंधः। तेन यद्यपि तावदूर्जं पशूनाप्नोत्यूर्जोऽवरुध्या इत्यनेन फलसन्निधापितं वाक्यते।
तथाप्यविहितस्यौदुंबरत्वस्य फलवचनमनर्थकमित्यर्थवादत्वमत्र विधिविरुद्धं तत्र। न च श्रुतित्वेन विधिः किन्तु
पजनस्य पुनस्तेनैव फलकल्पना संभवति वाक्यभेदप्रसंगात्। तस्मादर्थवादः। नचैवं विधेन कामशब्दरहितेन शक्य
तेफलं प्रतिपादयितुमिति पर्णमय्यधिकरणे वक्ष्यामः। अत्र तु साधनांशविचारमुखेनार्थवादत्वमुक्तं तत्र तु साध्या
शविचार इत्यपौनरुक्त्यं। अथवा साध्यांशे ध्येव विचारिते रात्रिसत्रन्यायेन फलपरत्वमप्यपापश्लोकश्रवणादीना
मात्रीकथं निराकरिष्यते चतुर्थे। न चौदुंबरतायाः फले विधीयमानाया आश्रयो लभ्यते। तत्रास्मादेव वाक्यादाश्रयकल्प
नायां वाक्यभेदः। पशुयागो हि प्रकृतः स तावदयोग्यः। यत्र हि गुणः कारकतामापद्यते स आश्रयः। यथा होमोदन्वनौदुंब
रता शक्नोति यागोपकारकी भवितुं। तदाश्रयत्वेन च यूपग्रहणमानर्थक्यं। अनुवादासंभवात्। यत्तु पशुनियोजनं यूपद्वारे
णयोग्यं गर्थं तदपि सह यूपेनैवाप्रकृतेन प्रकृतिवत्त्वेन तत्र संनिधिसंभवः। सहि दृष्टकृतत्वमिति लिंगाद्वा सामान्येन सं

न्नि धापयति न तत्र यूपस्य स्वरूपेणा विपरिवृत्तिरस्ति अविपरिवर्तमानस्य शक्यो त्यक्तुं या कोऽसौ परित्यजितुं। ताद
ग्रीव विपरिवृत्तिर्जुहादीनामप्यस्तीति तेषामप्यान्यत्वं स्यात्। तत्र तथैव यूपग्रहणमनर्थकमिति स्मादौदुंबरता यूपोद्दे
शेन विधीयते। तत् स्तुतिरियमजोवि रुध्या इति सिद्धं॥ हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्यां। ॥ एवमानर्थक्यप्रतियो
गितेनो विधिप्रतियोगिनोऽर्थवादा विचारिताः इदानीं हेतुप्रयोगिनो विचार्यन्ते। एवं श्रूयते शूर्पेण जुहोति तेन ह्यन्नं
क्रियत इति। तत्र संदेहः। किं शूर्पेण होमकर्त्तव्येऽन्नकरणता हेतुरुतार्थवाद इति। तत्र हित्वा शब्दकृत्या हेतुत्वं गम्य
ते। लक्षणया वा प्राशस्त्यं गम्यते। अनर्थकप्रायः स्यादर्थवादः हेतुश्चार्थवान्। कः पुनरस्यां हेतौ येन येनान्नं क्रियते नेशूर्पा
दन्येनापि पीठरादिनापि होमस्सिद्धिर्हेतोः प्रयोजनं। कथमत्र सिद्धायां व्याप्तौ हेतुत्वव्यपदेशः। अतएव हेतुव्यपदे ५
शो ह्याप्तिमन्तरेणानुपपद्यमानाद्व्याप्तिवचनं कल्प्यते येन येनान्नं क्रियते तेन तेन होतव्यमिति। तेन नेन वचनेन सर्वा
न्नकरणविधायिना शूर्पस्यापि होमसाधनत्वं सिद्धं। शूर्पेण जुहोतीत्यनुवादः। तेनेदृशमिदं वाक्यं श्रुतानुमि चतुर्था
तैकदेशाति ध्यन्नं शूर्पस्य होमसाधनत्वमन्नकरणत्वाद्धेतोः। अतः शूर्पमन्यद्वा यदन्नस्य करणं तेन होतव्यमिति ४
पूर्वः पक्षश्च। ॥ सिद्धान्तस्तु शूर्पस्य तृतीयाश्रुत्या करणत्वं गम्यते न तद्वाक्यानुमानिके द्वि पीठरादेर्निर्विकल्प्यपि
तुमर्हति। तथा वेदेनोच्यमाने शूर्पस्य होमसाधनत्वे हेतुमपेक्षते। वेदस्यैव तत्र प्रमाणत्वात्। अर्थवादस्त्वपेक्षितः।

प्रीतिर्यादृशी वर्तमाने· तेन स्वार्थेन लक्षणया २ अवर्तमाने २

प्ररोचनार्थत्वेन तस्मादर्थवाद इ। एवंचाप्रतिसिद्धव्याप्तिवचनकल्पना क्लेशो न न विष्यतीति। क्रियतरु त्विवं

र्तमाननिर्देशः प्ररोचनार्थे युक्तो न वृत्तिं न हि भूते भाविनि वा तादृशीं वर्तमाने निर्देशो युक्तः। विध्यर्थत्वेतु

लिङ्‌ प्रयोजनीलक्षणा श्रयणीया न च श्रोतेन वर्तमाना न्ना क्रियेण मुख्यालङ्करणोन्यच्च शक्यते होमः कर्तुं ति

स्मादर्थवाद इ। तदर्थ शास्त्रात्। ॥ गतोर्थवादप्रसंगः। मंत्रेष्विदानीं चिन्ता तेषामप्या द्याधिकरणे आनर्थ

क्यमाशंक्य व्याख्याय विधिवशेनार्थवत्त्वया भवितव्य मित्येतावदपवर्ग्य वक्ष्मितं कथितं तत्पर्यव सानाये

दानीं अर्थ विशेषश्चिन्त्यते। तेषां च क्रमप्रकरणाभ्यां कर्मैव ज्ञायते न वक्तिं दृष्टेनार्थप्रकाशेनोपकारेणान्व

ति किमुच्चारणमात्रेणादृष्टं कुर्वता मिति। तत्र यदि दृष्टार्थत्वं सेचस्यात् मंत्राम्नानमनर्थकं स्यात् ता

प्रत्यायनाददृष्टं कुर्वतामिति। चेत् उच्चारणमात्रोपरी। शक्यते कपायान्तरेणापि प्रयोगवेलाया मर्थप्रकाशनी

तद्युद्दितावन्मात्रमेव कार्य मंत्राणां स्यात्। तच्च ददाम्नान मनर्थकं स्यात्। अथ तु मंत्रप्रत्यायनान मनर्थकं स्यात्

अथो मंत्रप्रत्यायनाददृष्टं कल्प्येत। ततो दूरमपि गत्वा कल्प्य मदृष्टं तदुच्चारणादेव कल्प्यमितिं युक्तं। तद्धिपु

रुषव्यापारगोचरः प्रत्यायनं तु तस्मिन्ननुष्ठिते स्वयमेव भवति। स व्यापारेन पुरुषो नियुज्यते। यत्र नियुज्यते

तत्रैव फलाकांक्षा तेन यावश्यं ना विन्यदृष्ट कल्पना सा तत्रैव युक्ता। ननु तस्य प्रत्यायनार्थत्वं प्रत्यायनेन वाद

यतः २

ष्टार्थलिंगितेषु उक्तं। तस्माद् दृष्टार्थमित्राणां तथात्र तदर्थं वीरा[illegible] स्त्रा[illegible] तरथापि सीरवाद्यत्र यणे द्वे
त्रा४ स्यादिति। तत्राभिधीयते। यस्य दृष्टैनरज्जुपेन स्यात् तस्याऽदृष्टकल्पना। अनुष्ठेय स्मृते[illegible]ह मंत्रोच्चारणम
र्थवत्। स्मरणं च प्रयोगार्थं प्रयोगा[illegible] फलोदयः। एवं दृष्टार्थतालाभादृष्टपरिकल्पना। यस्त्र मंत्रेणैस्म
र्त्तव्यमिति नियमस्तस्य न किंचिद्दृष्टमस्तीत्यदृष्टकल्पते। मंत्रोच्चारणस्य तु दृष्टेनैवार्थवत्वात् तत्रानुपपत्त्ये
कशारणं मनवकाशं। तदर्थता स्मादयो हि गुणार्थवादपरिसंख्यादि त्रि४ परिहृता४। तस्मात् प्रकाशनेनैव मंत्रा
णामुपकारिता। उपाय नियमादेव तद्दृष्टपरिकल्पना। ॥ इति शास्त्रदीपिकायां प्रथमस्याध्यायस्य द्वितीयपादः॥ नार्थ
धर्मस्य शब्दमूलत्वाद शब्दमनपेक्षं स्यात्। कथं तु लक्षणो धर्म इत्येतद् द्विलक्षणार्थ इत्युक्तं। तत्र प्रथमे
पादे चोदनाप्रामाण्यं सिद्धं। द्वितीयेऽर्थवादादे४। एवं कृत्स्नस्य वेदस्य प्रामाण्य उक्ते[illegible]पौरुषेयीषु स्मृति स्मृतीना
व आचारेषु वैदिकपरिगृहीतेषु चिंता। यद्यपि चोदना प्रामाण्यमप्रामाण्येऽपि न विहन्यते। तथापि किं लक्षणो
धर्म इति जिज्ञासाधिकारात् स्मृतिप्रामाण्यं लक्षणे सीराती[illegible]व प्रामाण्येऽपि स्मृतीनां वेदस्यापि तत्सापे
क्षत्वात् अप्रामाण्यं स्यात्। यजना४ प्रतिनिर्दृतीत्यपि मंत्रैर्हूतत्वकर्मभिस्त्विन प्रतीयते। स्मार्तैश्च कर्मणि राधि ५
दैवतेति तदपेक्षस्य मंत्रस्य तदप्रामाण्यादप्रामाण्ये तत्र सामान्यादितरेषु तथात्वमिति सकलस्यापि वेदस्या

रात्रि २ स्मृतीनां ४

तिरात्रिं धेनु मिनायति। सं[illegible]

रात्रि २

तेन१

मेव१

स्पा२२

प्रामाण्यं वेदप्रामाण्यसिद्ध्यर्थं स्मृतिप्रामाण्यमिति संगतिश्चैतदेवी। यद्यपि स्मृतेरप्रामाण्यं ते[illegible]
र्त्तकर्मांगत्वे किंप्रमाणं न तावल्लिंगं तस्य सामान्यसंबंधप्रमाणसापेक्षत्वात् [illegible] तदा मंत्रस्य स्वा
विनियोजकं तथापि फलवदंगत्वेनाफलस्यांगित्वे नियोगात् स्मृत्यप्रामाण्येन नापि स्मृतिवाक्यं तस्याप्रामाण्यात्। यद्यपि च लिंगमस्ति
न सापेक्षता स्यात् [illegible] त्यपि च मंत्रप्रामाण्ये सकलस्याप्रामाण्यं कुतस्त्यं स्मार्त्तस्य कर्मणः फलवत्त्वाभावान्नतादर्थ्यं मंत्रस्येह
दपि तु सापेक्षत्वाच्च लाकृतं न च तत्कस्य तदर्थीति कथमप्रमाणी तस्मान्नैव संगतिश्च संभवतीति पूर्वोक्तैव संगतिर्ज्यायसी। धर्म
प्रमाणचिंताधिकारात्तत्स्मृतीनामपि प्रामाण्यं प्रतिपाद्यते इति। नन्वेवं चोदनैवेति प्रतिज्ञाव्याकोपः। तन्मूलत्वेन तद्वत्प्रामाण्ये
तरेषां प्रामाण्यात्। स्यात् त्रयेण प्रामाण्याभावात्। तदिह किं स्मृत्याचाराणां धर्मे प्रामाण्यमुतनेति विचार्यते। तदर्थं चास्यु
निर्मूलत्वमेषां भ्रांत्यादिमूलत्वं चेति विचारयितव्यं। तत्र प्रायेण ऽनृतवादित्वात् पुंसां भ्रांत्यादि संभवात् चोदनानु
पलब्धेश्च श्रद्धामात्रात् प्रमाणता। संभवद्भ्रमवि प्रलंभेषु पुरुषेषु नन्वावलिंबि विचिकित्समेव प्रामाण्यं स्वध्यवसानं। अ
लवेदत्वं पौरुषेयत्वात् नचोदनामूलत्वेनं तदनुपलंभात्। तदुपलभ्यमाना चोदनाः स्वप्रमेयं प्रतिपादयंति। नवा
सौ प्रत्यक्षे त्यं चोपपद्यते न संभवः। अनुच्चार्यमाणत्वात्। उच्चार्यमाणात्वे स्मृतिप्रणयनवैयर्थ्यं। प्रत्युपहिता अपि संप्र
ति पुरुषस्य यादुच्छिन्ना इति चेत् न। विकल्प्या संभवात्। यो हि तत्साद्रक्षो चोदनानां वदति स वक्तव्यः। किमेका कारिका सा
स्मार्त्तकृति संघातास्तिका प्रलेमासीत् सा चेदानीमध्येतृक्षयात् उत्सन्नेति कल्प्यते। किं वा बह्वीषु शाखाविलक्षणतः

मूलत्वेनतदनुपलंभ४

श्रुतयः स्मृतिमूलत्वेन कल्पिताः पठितानां संप्रति उच्छन्ना इति। तत्र सहस्रसामशाखाः एकशतमध्वर्युशाखाः एकविंशतिशा-
खा बह्वृचाः इत्यादि मत्स्यादिशाखापरिमाणस्य परं परया सर्वलोकस्मरणात् नातोऽधिकाः शाखाः संभावयितुं
शक्यन्ते। नापि तत्र पठ्यमानानामेव .... मध्ये कासांचिच्चोदनानामुत्सादनसंभवः। न च संभवे-
पि पठितानामेव विप्रकीर्णासु स्मृतिमूलत्वेन श्रुतयः इति युक्तं। स्मृतिप्रणयनवेलायां दृष्टत्वात्। तत्र तावदिदानीम-
संतिका स्वेव पठिताः श्रुतयः स्मृतीनां मूलं। नापि नित्यानुमेयाः। अध्यापकपरम्पराभावात्। या हि चोदना न कश्चिदु-
च्चारयति तस्याः सर्वपुरुषप्रत्यक्षादिप्रसराभावात् दुर्लभतरमस्तित्वं। ननु स्मृतिलिंगवशे नानुमाने प्रसरस्तावत्
सर्वेषां लिंगादिकल्पना स्विव, विषम उपन्यासः। लिंगं ह्योपि सर्वप्रत्यक्षादिविषयाः श्रुतिमंतरेणानुपपद्य-
माना युक्ता यत्र स्यात् निश्चयमादधाति। वाक्यस्य च नानुपौरुषेयी यदर्थविषयो पकल्प्यते। तद्विषयमेव स्यावितु
शक्तिं कल्पयति अष्टकाकर्तव्यताविषयं स्मृतिवाक्यमिति। नूनमयमष्टकाकर्तव्यतां वेदेत्येतावत्प्रत्यये कल्प्य-
ते न श्रुतिस्वरूपं नापि श्रुतिज्ञानं एवमर्थज्ञाने स्मृतिकारस्य कल्पिते पश्चाज्ज्ञानलिंगाद्दृयमूलार्थानुमाने
न श्रुतिकल्पना। एवं स्मृतिकारान्तरस्यापि स्मृतौ तल्लिंगादर्थ एवानुमानमिति निष्प्रामाणिका श्रुतिकल्पना
स्यात्। अपोच्येत न खलु परकीयेन ज्ञानेनस्मद्धितो वार्यनिर्णयः। मूलानुसंधानसापेक्षत्वात्। तत्र यदि स्मृ-

मूलानुसंधानाविस्मृते स्मृपे:

नष्टाजे द विष नाः

तिकारस्यार्थविषयज्ञानमूलमनुसंधानं स्मृत्यंतरमेव न संभावयेत् तदपि विज्ञानस्यैव लिंगं नार्थस्य एवं तत्तत्
पूर्वतरमपि स्मरणं ज्ञानस्यैव लिंगं नार्थस्येति न कश्चिदर्थनिश्चयो लैंगिको लभ्यत इति श्रुतिरेव न कल्प्यपि
तथा यद्येवं स्मृतावपि तुल्यमिति। स्मृतिकारस्य मूलतया श्रुतिज्ञानमेव प्रथमं कल्प्यते इति न श्रुतिसद्भा
वः। श्रुतिविषयेणानुज्ञानेनानुमीयमानश्रुतिविनिर्णयः। परज्ञानेन त्वलब्धश्रुतिनिश्चयो मूलानुसंधानसापेक्षोऽनु
लंच स्मृतिकारस्य स्मृत्यंतरमेवा तदपि चार्थज्ञानद्वारेण श्रुतिज्ञानस्यैव लिंगं न श्रुतिसद्भावस्येति न कश्चिदपि
ज्ञानेनार्थनिश्चयः। ततोऽर्थस्मरणपरंपरयार्थस्यैवानुमानान्न श्रुतिसद्भावे कल्प्यमाने तत्र कोऽपि विशेषः। तेन यदि परकीयेन
स्मरणपरंपरयाप्यविच्छिन्नमूलनिश्चयः स्यात् वेदस्य वेदनादीनामपि पूर्ववाक्यपरंपरया धर्मत्वानुमानं स्यात्। अथ स्मृत्यंतरमेव मूलं स्यात् अधर्म
धर्मापेक्षं ततोऽयं वै वयं मानवीयात् स्मरणाद् मन्वर्थविषयं श्रुतिविषयं च ज्ञानमात्रं कल्प्य विना श्रुतिसद्भाव
ज्ञानमनिश्चित्य तन्निश्चयाय मन्वादिश्रुतिसद्भावं मूलं प्रमाणं मृगयामहे। तथा मनुस्मृतस्य सोऽप्यन्यस्येति श्रुति
सद्भावासिद्धिः। एवमुन्नयथा श्रुतिनित्यानुमेया न सिध्यतीति तन्मूलत्वेन प्रामाण्यं स्मृतीनाम्। अतश्च प्रामाण्या
च्छिन्ने इति स्मृतिप्रमाणमिति प्राप्ते विधीयते। वैदिकैः स्मर्यमाणत्वात् तत्परिग्रहदार्ढ्यतः। संभाव्यवेदमूलत्वा
त् स्मृतीनां वेदमूलता। एवं हि वेदस्यैव धर्ममूलता नान्यस्येति आस्थिता मन्वादयस्तेषामष्टकादिस्मरणं न च

धात्तु

ध्रुस

न भूतधा जातेनसादे वर्धा

अष्टकादि २

स्मृति २   त्व१

संविदुप[illegible]घ्यते न यद्दि वेदमूलत्वं तथा वैदिकानामेवाखिलैः परिपूर्णया परिग्रहो वैदिकैः स्मरणं च शिष्टानां नास
ति वेदमूलत्वे कल्प्यते संभवति त्रैवर्णिकानां वेदसंयोग इति तन्मूलत्वमेवाध्यवसीयते। अत्र मनुप्रभृतीनां मूलत्वेऽप
प्रतिसिद्धे ना[illegible]र्थं निरवं मूलं[illegible] श्रुतयः संप्रत्यपि विच्छिन्नं[illegible] श्रुत्या स्वीतराध्यायिभिः श्रा स्वीतरगतानामनु
पलंभात् तादृशे नार्थे वनि बंधनमुपलंभेऽपि वा मंदबीति स्तुपसंहरणीया नामुपसंहारफलं स्मृतिप्रणयन
मिति न वैयर्थ्यमतः स्मृतयः प्रमाणमिति सिद्धं। ॥ विरोधे त्वनपेक्ष्यं स्यात् असति ह्यनुमानं॥ ॥ उक्तस्वरूपस्य स्मृतिप्रा   उत्सर्गप्रा[illegible]
माण्यस्यापवादः क्रियते। अत्र प्रत्यक्षश्रुतिविरुद्धाः स्मृतय उदाहरणं सिद्ध्यंते। किं प्रमाणमप्रमाणं वेति तदर्थं
पूर्ववदेव श्रुतिमूलत्वं नीत्यादि मूलत्वं चेति चिंतनीयं। तत्र पूर्वाधिकरणे समर्थितमिह पूर्वः पक्षः। न च प्रत्यक्षश्रुति
विरोधात् स्मार्तश्रुतिकल्पना नवकल्पते। कथं संभवात् व्रीह्यादि श्रुतिवदत्र द्वयोरसंभवत्वेनैक विषयेण प्रत्य
क्षेणेतर[illegible] विषयानुमानं प्रमेयापहारादनायासेन निराक्रियते यतेवकाः विपन्नं तस्यानुमानं। यत्र तु
द्वयं संभवत्यत्र व्रीहिप्रमितमपीतरश्चेतरस्य विषयमपहरतीति न तद्विषयमनुमानं शास्त्रोक्तिप्रतिषेधं। संभवति
च युगपदनुपसंहरणीयार्थमपि श्रुतिद्वयं व्रीहियववत् ह[illegible] अर्थान्तरग्रहणाग्रहणादि विषयश्रुतिवदिति प्रत्य
क्षेणापि स्पर्शविधिना सर्वचेष्टमनुमानेन शाक्यं निराकर्तुं कथं तर्हि श्रुतिलिंगादिषु पूर्वपूर्वेणोत्तरोत्तरस्य बाधः।

न श्रुतिविषय१

तत्रापि श्रुतिद्वयसंभवान्नैकश्रुत्या कल्प्या विरोधकर्तुं शक्यते। उच्यते। नैव तत्र प्रमेयापहारनिर्बन्धनो बाधः। किन्तु क
ल्पना मूलोच्छेदात्। यावद्धि मंत्राम्नानमनवगतप्रयोजनं प्रकरणे चाकृतार्थः तावदेव तल्लिङ्गार्थश्रुतिकल्पनं प्रमा
णवत्। यदा तु श्रुत्यैकश्रुत्या द्वयोरपि नैराकांक्ष्यं तदा मूलोच्छेदादाकांक्षाधीना श्रुतिकल्पना नैवोन्मज्जति। अत्र तु
प्रत्यक्षया श्रुत्यानन्तरमूलाकांक्षा निवर्त्यते। यतो मूलोच्छेदादनुमानविरोधः स्यात्। यदि परं प्रमेयापहारादन्नाविव
शेषत्वानुमानं प्रत्यक्षेण विरुध्यते। न चैवं संभवति द्वयमसंभवात्। अग्नेर्हि शेषत्वोत्थेन संभवतः परस्परोपमर्दक
त्वात्तयोः। अतः प्रत्यक्षेणोत्थेन शेषत्वस्यापहृतत्वात् न तद्विषयमनुमानमुदेतुमुत्सहते। अत्र च संभवति श्रु
तिद्वये यत्र व्रीहिवत्फलम्। अथवा श्रुतिस्वापि प्रमेये मिथो विरुध्येन व्रीहिशक्त्या यवशक्ति विरुध्यते। साबान्तया
नामपि प्रामाण्यमिति प्राप्ते विधीयते। अप्रामाण्ये विरुद्धार्थे म शक्यार्थविधानतः" औदुम्बरीं न शक्नोति सर्वां वेष्ट
यितुं स्पृशन् वेष्टितां वापि संस्पृष्टुमतोऽन्योन्यविरोधतः। प्रमेयापहृतेरेव बाधः स्याद्वक्ष्ये शेषवत्। अत्र
कार्थे विधेयता हि मूलश्रुतिविरुद्धमप्रामाण्यमिदानीं विधीनां स्मार्तत्वे दित्यादिवत् शक्यं संस्पृष्टुं तावद्वेष्टयि
तुं वेष्टयितुं वा स्पृष्टुं वा। अतो वेष्टयेत् स्पृशेदित्यशक्यार्थविधानात् वा उभयोरपि प्रामाण्यं संभवतीत्येव
रूपमन्यतरत् सर्वां वितर्वा। ननु शक्तिमात्रे प्रमेये संभवति द्यालुक्षीयमाणयोरपि शक्तिरिति सत्यमनुष्ठानविशेषे

दिर   नर   गार्गीतरे   ६

प्रमेयन्तु शास्त्रस्य विरोधादुभयोः प्रामाण्यमनुपपन्नमिति। नैकस्यापि बाधो युज्यते। किमिदानीं गार्गीतरे दृष्टिनासि
चैत्यादीनामपि प्रामाण्यमनुष्ठीयमानस्यापि शक्तिसंभवात्। तथा सामान्यविशेषशास्त्रयोरपि न विरो
धः स्यात्। आहवनीयपदयोरुभयोरपि शक्तिसंभवात्। अतश्च आहवनीयस्य नपदेन बाधः। अविरुद्धस्य दुर्बल
स्यापि बाधायोगात्। नचात्र कृत्यादि नचात्र कस्यादि ति विवक्षितादीनां मूलोच्छेदेन कृतिकस्यनाविरोधाद्
बाधः संभवः। सामान्यशास्त्रस्यापि प्रत्यक्षत्वात् मात्रेण होमीतरविषय पद होमेष्याहवनीयसिद्धेः। अतोऽत्र सामग्री
विरोधासंभवात् प्रमेयविरोधादेव बाधो नाम कर्तव्यः। शक्तिमात्रेवा प्रमेयं तद्विरोधाभावान्न बाधः सिध्येत्। एवमुत्पत्त्यु
त्पन्नविशिष्टनित्यनैमित्तिकादिषु प्रसंगोऽदर्शयितव्यः। तस्मादवश्यमनुष्ठानविरोधे शास्त्रविरोधादेव बाधो
कर्तव्यः। किंच न शक्तिमात्रं कृतार्थकथनं विधिना बोध्यते। प्रवर्तना रूपो हि विधिरर्थात् समीहितसाधनता
शक्तिं बोधयति। प्रवर्तनायाश्चाक्यविषयानसंभवतीति स्यादेवाप्रामाण्यं। यद्यपि समीहितसाधनतैव विधेयं इ
त्याश्रीयते तदपि न तावन्मात्रं विधिः। किंतु कर्तुः समीहितसाधनता नवाशक्येऽर्थे संभवतीत्यप्रामाण्यं। यदुक्तं। आ
ख्यातानामर्थं ब्रुवती शक्तिः सहकारिणीति। तेनाशक्यानुष्ठानमर्थद्वयं बोधयतोः प्रमाणयोः प्रमेयविरोधा
दवश्यमन्यतरत् बाधितव्यं। तत्र प्रत्यक्षत्वेनानुमानस्य बाधोऽन्यथा विरोधानुमानस्येति। सिद्धमप्रामाण्यं स्मृतीनी

वत्र५   कर्तव्यं ३

स्मोक्त श्रुति विरुद्धानां। वीह्यादिषु द्वयोरपि प्रत्यक्षत्वेनाऽनुमीयमाण विशेषत्वात्‌ नैकेनेतरस्य बाधः संभवति। विरुद्धार्थत्वा
द्वयो राज सूयेन आपाणर्वत्वा प्रामाण्ये अविद्यमान दोषयोः संभवतीति मत्स्य न्याया दुभयो रपि पाक्षिको बाधः
कल्प्यते। नचैवं शास्त्रस्या प्रामाण्यं यथा सामान्य शास्त्रस्य विशेष शास्त्र बाधितस्यापि नाप्रामाण्यं तद्विहापि। ननु
बाधितेऽनवकल्प्यप्रमाणे न भवतीति व्याहतमेतत्‌। सत्यमेवं न त्वत्र पारमार्थिकः शास्त्रार्थो बाध्यते येना प्रामाण्यं शास्त्र
स्य स्यात्‌। किंतु प्रतिपक्षमनालोच्य यतोयः शास्त्रस्य स्वरसतः सार्वत्रिकः प्रत्ययः सोऽत्र बाध्यते सह्याधाद्या पा
क्षिकानुष्ठानपरत्वं शास्त्रस्याध्यवसीयते। सामान्य शास्त्रस्येव विशेष शास्त्रानाक्रांत विषय परत्वमिति ना
प्रामाण्यं। नचैवं स्मृति वचनेन श्रुतिस्वरूपमेतेन स्पर्शनस्य पाक्षिकं वैकल्पयितुं शक्यते स्मृतेः स्वरतोऽप्रमाण
त्वेन श्रुति बाधासामर्थ्यात्‌ श्रुति कल्पनस्य प्रत्यक्ष श्रुति विहित स्पर्श विरोधेन विरुद्धत्वात्‌ नानुपाक्षिकत्वेना
पि प्रत्यक्ष श्रुतेरूपपत्ते र्यस्मिन्‌ पक्षे सा नाद्रि तत्र स्पर्शाभावेन वेद्दान स्यापि शक्यानुष्ठानत्वात्‌ तद्विषये श्रु
ति कल्पन मुपपन्नमिति चेन्न इतरेतराश्रयत्वात्‌। स्वरसतो हि श्रुति वाक्या दपाक्षिकस्य स्पर्शनस्य तत्‌ सिद्धे
श्चापाक्षिकेन तस्यार्थ श्रुति कल्पन मशक्यत्वात्‌। नहि स्पर्शवता चेष्टयितुं शक्यते तत्र स्पर्शनस्य पाक्षिकत्वे स
ति शक्यार्थे मापाद्य काल्पनिक श्रुतिरात्मानं लभते तत स्पर्श लब्धा विकायी तद्विरोधात्‌ स्पर्शनस्य पाक्षिके क
ल्पे सति शक्या र्थतामापाद्य काल्पनिक श्रुति रात्मानं लभते तत स्पर्श लब्धाधिकायी तद्विरोधात्‌ स्पर्शनस्य पा

बोध
म्र तेर्थ.
र्मसम्य
ना दिस्म
ति

चिकत्व मित्तरेत राश्रयत्वंस्यात्। अतोत्र श्रुत्यसंभवात् स्मृति मूलकत्वात् अप्रामाण्यमेवं जातीयकानां नह्यसंभवस्मृ
त्यादिकर्त्वं कस्यचिदपि शक्य मध्यवसातुं संभाव्यमानेतु स्मृत्यादौ दृष्टत्वगुणा दृष्टकल्पना असत्ति तु विशेषे कर्तृ
सामान्याद्वैदिक परिग्रहदार्ढ्याच्छ्रुत्यनुमान मिति न सर्वत्रैकरूप्यमिति॥ हेतुदर्शनाच्च॥॥ अधिकरणं तत्रैवा-
त्र गृह्य माणकारणं श्रुत्य विरुद्धं स्मरणमुदाहरणं वैसर्जन होमीयं वासो ध्वर्युर्गृह्णातीत्यादिं तत्प्रमाणमप्र
माणं वेति विचारः। कर्तृसामान्यात् प्रत्यक्ष श्रुति विरोधाभावात् प्रमाणमिति प्राप्ते निधीयते। न दृष्टे हेतौ हेत्वंतरा
नुमानं प्रक्रमते। दृष्टश्चात्र लोभ एव हेतुरिति तत्र एव बकस्तुपप त्रेर्नात्र तत्परिदृष्टे वेदिकं वचनं कल्पनोपप
त्तिः। अश्रुतिरिति चिरं दृष्टकारणत्वस्मरणप्रमाणतो नप्रमाणमिति। यस्त्वाचार्यैराधिकरणं गोहरि
तः तत्रापि प्रायः। न वेदस्य स्मृते र्बाधो यदि स्मृतिमूलं न कदाचिदपि कैश्चिच्च कस्यां चिदपि शा
खायां पठ्यत इति अध्यवसातुं शक्यते। तदा हि तत्र पुरुषाणामेव प्रत्यक्ष प्रसराभावात् केवलं स्मृत्यनु
मान समधिगम्यं श्रुति वाक्य मनुमानस्य प्रत्यक्ष विरोधे नुदया त्सकलजन समक्ष प्रमाण पथानुवर्त्ति
गगन कुसुमायमानं स्यात्। नत्वेवमध्यवसातुं शक्यं अनंतचरण घाराणामनेक सहस्राणां वेद शाखा
नां कासांचन लोपाभावात् एवं चानध्यवसीयमाने सत्यपि विरोधे तु लब्धांतरम प्रामाण्यं नित्यानुमेयश्रु
तिमूलता निराकरणात्। यदा हि शाखांतरगतानि पुरुषांतर प्रत्यक्षाण्येव वेदवाक्यानि स्मृतीनां मूलं

मा

तदावेष्टनवा कथमपि पुरुषांतर प्रत्यक्षता यासंभवा प्रमाने कथमपि शक्यं नास्तीति वदितुं द्वेधा हि तस्या भा
वावधारणं बाधकसद्भावाद्वा साधकप्रमाणाभावाद्वा नवेद् बाधकसद्भावेपि द्वेधा द्वय्या दर्शनाद्वा तदभाव
नियता यीतरदर्शनाद्वा। न तावद् द्वय्या दर्शनं समस्त शाखोपलंभाद्यौ दिलक्ष्को। न च विरुद्धस्य दर्शनं तदभा
व नियतं येन तद्दर्शना तदभावोवधार्येत॥ विरुद्धानामपि ग्रहणाग्रहणादि श्रुतीनी सहस्रशोदर्शनात् तेन
नना च बाधकसद्भावानामपि साधकाभावः। स खलु आत्मीयः सर्वेषी वा भवेद्। न तावत् स्वप्रमाणनिवृत्त्या
वत्तस्यभाव निश्चयोति प्रसंगात्। न च समस्त पुरुषाणाममत्र प्रमाणं नास्तीति शक्यते निश्चेतुं। संभवति हि तस्य शा
खांतरे समाम्नातं पुरुषांतरेण प्रत्यक्षीकरणं नित्यानुमेयत्वेहि सर्वेषामिहानुमानमेव प्रमाणं स्यात्। तद्व
प्रत्यक्षश्रुति विरोधनोदेतीति सर्वपुरुषाणां साधकप्रमाणाभावादीषश्कर मभावावधारणं स्यात्। न च तद
स्मात्तु श्रुति निराकरणं। तदुक्तं। आत्मीयात् परकीयस्य दौर्बल्यं न हि किंचन। प्रत्यक्षत्वाविशेषेण स्वप्रत्यक्ष
समं हि तत्। यदा चैवं स्वशाखा पठितश्रुतिमूलप्रमाणकतया स्मार्त्तमपि वेदवाक्यं संभाव्यते तदा स्मृतिलिंग
कानुमानं न केन चित् प्रतिबध्यत इति न निर्मूलत्वं स्मृतेः शक्यते वक्तुं। ततश्च वेष्टन स्पर्शनयो रात्मीयपरकी

श्रुतिविहितयोस्तुल्यकक्षप्रमाणतया विकल्पो न्याय्यः । यदि परमो ... प्रत्यक्ष २ ... नाधिकार्थकत्वात् ...

य प्रत्यक्षस्य विप्रलम्भनीयता तदा तेनैव प्रत्यक्षमनादृत्य व्यवहारः क्रियते । ततः क्रियतां अनादरणीयं सह
स्त्रतमेत्रं परप्रत्ययस्यादृष्टमूलस्य ... यात्रास निमित्ततश्चेत्यादि मूलत्वसंभवादेर्वा समभिव्याहारादिति च
नाप्रामाण्यावसानं । व्यवहारविशेषो कियत्प्रतिपादनार्थं चेदं सूत्रं । विरोधे त्वनपेक्ष्यं स्यादिति । श्रुतिस्मृत्यो
र्विरोधे यत्प्रमाणं तारतम्यपेक्ष्यं श्रुतिवाक्यं तदेव ग्राह्यं असति ह्यात्मप्रत्यये परप्रत्ययानुमानं ...
मिति यथाह । यावदेकं श्रुतौ कर्म स्मृतौ वान्यत् प्रतीयते । तावत्तयोर्विरुद्धत्वे श्रौतानुष्ठानमिष्यते । इति । तेन फ
लतो प्रामाण्यं श्रुतिविरुद्धानां स्मृतीनामिति स्थितं ... ष्य अननुष्ठानरूपाप्रामाण्यपर्यवसायी । यद्वा यान्येता
नि त्रयीविद्भिर्न परिगृहीतानि शाक्यादिनिर्मितानि धर्मशास्त्राभासानि तेषामनेनाप्रामाण्यं । पूर्वसूत्रोक्त
कर्तृसामान्यप्रत्यक्षाहरणेनोच्यते तेषां हि प्रत्यक्षादिमूलत्वेन प्रामाण्यं प्रत्यक्षसूत्रे निराकृतं मन्वादिवद्वे
वेदमूलत्वेन प्रामाण्यमिह निराक्रियते तेषां ह्यसत्यपि प्रसिद्धवैदिकैरपि होत्रादिभिः कर्तृसामान्ये
भिन्नप्रस्थाना वेदामूलं न विषीति । यथैवाथर्वणस्य त्रय्या भिन्नरूपता तथा चानुष्ठेऽपि वेदेभ्यो भिन्नरूपा
... सः खलु युक्तं वेदानां प्रलीनाः मन्वादीनामपि हि केचित् प्रलीनशाखामूलतां मनुमन्यन्ते न तदत्रापि भवि
... २ तोऽच संभवति प्रामाण्ये नाप्रामाण्यं युक्तमिति भवति केषांचिदाशंका सा च मंदविषन्यायेन नि

अपि नाकर्मसामान्यात ... माला मनुमानं स्यात् ... निस्मत्या धिकरणासिद्धान्तस्त्रेऽ मिहोत्रादीनां वैदिकरूपपदार्थानां येकर्तारः तएव अष्टकादिस्मृतिकर्तार इति
कर्तृसामान्यात् प्रामाण्यं युक्तं तदभावे प्रामाण्यं नास्ती ...

रामकृष्ण श्री पिर्यू। नश्रात्क्षपरिमाणत्वात्

१२ यज्ञोपवीतिनाकर्त्तव्यं

राकर्त्तव्येवेत्येवमर्थमिदमधिकरणं। तत्र पूर्वः पक्षः। सिद्धौ तस्य। अविच्छिन्नवैदिकपरिग्रहानुपपत्त्या
मन्वादिष्वनुलभ्यमानोपि वेदः कल्पितः। शाक्यादि। यदि मत्यैं तद्विपरीतमवैदिकप्रमाणं च तदित्येव
शिष्टानां स्मरणं वेदवैदिकद्वेषिण एव तेषां प्रामाण्यमनुमवते दृष्टानुसारिणीचकल्पना मतद्वि
परीत्येन। अतोत्र वेदकल्पनादवीयसीत्यप्रामाण्यमेव तेषामसन्मूलत्वादिति ॥ शिष्टाकोपे विरु
नाकर्त्तव्ये द्धमिति चेत्। आवीतेन कर्तव्यं दाक्षिणाचारेण कर्तव्यमित्येवमादीनि क्रत्वार्थांगस्मरणान्युदाहरणं
किं प्रमाणमप्रमाणं वेति विचारः। तदर्थं च प्रत्यक्षश्रुत्या विरुद्धं तेन वेति। तदर्थमप्येषः क्रतुमध्येनु
क्षीयमाने कस्यचित्क्रत्वर्थस्य क्रमादेर्वा धान्नवति न वेति। अथवा स्वरूपेत्येव विरोधे प्रमाणमप्रमाणं वेति वि
चारः। तदर्थं च प्रमाणप्रमेय बलाबल विसंवादे किं न्याय इति चिंत्यते। श्रुतिस्मृत्योः श्रुतिर्बलीयसीति
स्थितौ। अतः श्रौतत्वात्क्रमादयः स्मार्तेभ्य आचमनादिभ्यो बलीयांसो विज्ञायंते। प्रमेयस्वरूपालोचने नष्टाध्यायें
पदार्थगुणत्वात् क्रमादेरप्यमनादयः पदार्थाबलीयांसो वगम्यंत इति बलाबलद्वयविसंवादात् कतरे
ण निर्णय इति संदेहः। तत्र पूर्वपक्षः। श्रुत्युक्तानां क्रमादीनां स्मार्तैराचमनादिभिः शिष्टाकोपं स्यादत स्वाच

द्विष्यिष्टे स्यैव विरोधिता। ततः श्रुतिबलीयस्त्वात् स्मृतेः स्याद् अप्रमाणता। पूर्वत्रापि प्रमाणत्वे प्रमेयत्वाद् ब
लावत्त्वात्। न्यायत्वेनैव निर्णीते तेन पश्चाद्धितराद् दृस्थात्। नैराकांक्ष्यात् प्रमाणत्वं मतं स्मृत्यर्थबाधनी। वेदं
कृत्वा वेदिं कुर्यादिति क्रमः कालश्च यः प्रयत्नी गानाभ्यविप्रकर्षः प्रयोगप्राशुभवश्च प्रयोगवचनावगतो
यश्च कृत्वा क्रादिं परिमाणो वाविस्मृत समस्तपदार्थानुष्ठानसिद्ध्यर्थं प्रयोगविधिनैवाकांक्षितो। पदार्थविधिप्रव
यावगतैं तत्रितयमपि क्रमकालपरिमाणात्मक माचमनादिति रन्यथात्वं प्रतिपद्यते। तेन विरोधस्त्वाचदस्यैवा
विरोधे श्रुति बलीयस्त्वात् स्मृत्यर्थस्याचमनादेर्बाधः। न च श्रुत्यर्थेपि पदार्थगुणभूतत्वात् क्रमादेर्दुर्बल्ये
आचमनादेः स्मृत्यर्थस्यापि पदार्थत्वात् बलीयस्त्वमितिवाच्यं। प्रमाणपूर्वको हि प्रमेयानुगमः। तेन पूर्वत्रा
वि प्रमाणस्यैव बलाबलं पूर्वं गम्यते। तेन चाचमनादिभ्यः क्रमादीनां बलीयस्त्वे निर्णीते निराकांक्षत्वात् पश्चा
दवगते प्रमेय[illegible] विताबलाबलमादर्तव्यं। तस्मादाचमनादिस्मृतीनामप्रामाण्यं। सिद्धान्तः ॥ पदार्थप्रा
धान्यपेक्षत्वात् क्रमादेरविरोधिता। विरोधेपि च दौर्बल्यं पदार्थेभ्यो गुणत्वतः। सर्वेषु पदार्थेषु प्राप्तेषु प्रयोगवेला
यीतद्विशेषणतया क्रम आश्रीयत इति तेन पदार्थप्राधान्यापेक्षत्वात् क्रमस्य तत्र जघन्य प्रमाणकोपि पद
र्थः पूर्वं प्राप्नोति पश्चात् क्रमः [illegible] पदार्थप्रयोगीतया तत्र चापि पदार्थे विरुध्यते। कालोप्येवमेव प्र

गन्धानादेरनियतत्वात् नियमेन स्मरणसिद्धिः । तदर्थं प्रयोगविध्यर्थत्वमेवावश्यं वाच्यं इत्याशंक्य अष्टकादेनीह अथापि

बलवद्विरोधापेक्षमप्रमाणं । न तदभावापेक्षया प्रमाणमेवेत्यवगंतव्यं । नचात्र बाधकमस्ति । प्रमाणान्तर

योगीनाञ्चाष्टावेतः पदार्था अवधारिताः तेषां सर्वं बाम्येव सर्वाष्टकादि कालवद् प्रधानसन्निकर्षः प्रयोगप्राप्तु
नावश्यापरिमाणीनुनकस्य हि छन्दस्त्वस्यार्थः । प्रयोगान्तरैरपि तदाक्षिपति । अन्यथा पदिस्मरणसिद्धेः । अ
थापि शास्त्रार्थस्तथापि प्रयोगोपयिकत्वात् प्रयोगस्य पदार्थप्राप्त्यपेक्षित्वाद्विरोधिहर्षे । यद्यपि क्रमादी
नामाचमनादिभिर्विरोधस्तथापि सर्वपदार्थगुणत्वाद्दौर्बल्यं । आचमनादयस्तु पदार्थत्वात्बलवंतः । नचप्र
माणबलाबलस्य सर्वथाविदितं नहि प्रमाणयोः स्वरूपतो विरोधः अपितु प्रमेयविरोधनिमित्तः प्रमाणग
तोहि विरोधमालोच्य प्रमाणविरोधबुद्धिर्भवति । तद्यदेव प्रमेययोर्विरोधो गम्यते तदैव तयोर्बलाबलमपीति ।
ततएवच निर्णये काले नेराकांक्ष्याच्च प्रमाणबलाबलमनादृत्य व्यमिति स्मृतेर्बाधः । यद्धि स्वभावत एवाप्रमाणं
वे तत्सदैवानादृतव्यं यत्तु बलवत्स्याबाधकत्वात् तस्मादाचमनादेर्बाधकीय स्यात् तदनुरोधेनैव श्रुतफलत्व
माद्योबाध्येत इति आचमनादिस्मृतीनां अबाधात्प्राप्तमपि ति । न विदमेवमधिकरणं । पूर्वपक्षस्यातिमे
दत्वात् । यज्ञोपवीतादेः प्रत्यक्षश्रुति विहितत्वे नानुदाहरणत्वात् । तस्माद्यथा पूर्वं शाक्यादिशास्त्राणां साधनप्रा
माण्यमुक्तं तत्रैव चोद्यो नरवेणादीसूत्रद्वयं व्याख्येयं । यत्तु ते च हिंसावचनं श्रुतिस्मृतिशिष्टस्कोपयति तत्प्र
माणं नवचितिचेत् चोदनैशास्त्रपरिमाणत्वादिति न स्वल्पयमकेनचित् प्रमितो धर्मःफलं साधयति । स्वाध्यायो
ध्येतव्यो वेदो धर्ममूलं तद्विदांच स्मृतिशीले धर्मज्ञसमयः प्रमाणं वेदाः पुराणान्यायमीमांसा धर्मशास्त्री

देशात्कर्मकर्तृव्यक्तियाचमनादेः कृताकृतादि मितादिविज्ञानसाकल्या ... कर्तुं संस्कार ... वैदिकपदार्थानां ... तेनायज्ञोपवीतिनावश्यं
... गृह्याचमनादेः ... श्रुतिसमसौ ...
... पूर्वपक्षस्य मन्दत्वं

गमिष्यितार्थः वेदाङ्गानि विद्यानां धर्मस्य च चतुर्दशेत्येव मन्वादिभिरेव धर्मप्रतीते र्विषयमादन्यतः प्रतीतस्य फल
साधनत्वाभावेन धर्मत्वाभावात्तेषामप्रामाण्यमिति। यत्तु तृतीयं सूत्रमपि व्याकरणग्रहे युक्तानि प्रतीयेरन्
श्च दर्शनाद्विरोधस्येति तत्सदाचारप्रामाण्यप्रतिपादनार्थमधिकरणमिति व्याख्येयं। अत्रापि वेदानावसं
तोत्सवादय उदाहरणं प्रमाणमप्रमाणं वेति संदेहः तदर्थं स्मृतिमूलत्वं नवेति चिंतनीयं। तत्र स्मृत्यधिक
रणकर्तृसामान्यादाचाराणामपि स्मृतिवत्प्रतिपादितमपि निर्निबंधनतया व्यतिक्रमसाहससंकराद्या
क्षिप्य समाधीयते। यदि वसंतोत्सवादयोऽष्टकादिवद्वेदमूलाः स्युस्तत्र तद्वदेव मन्वादिभिरपि बध्येरन्
अनिबंधनान्नु नैषां मूलं केनचिद्दृष्टं आचारपरंपरामात्रमेव दृष्ट्वा मन्वादिभिरपि सदाचारः प्रमाणमित्ये
वं परोक्षरूपेणाभिधानात् प्रामाण्यमनुमीयत इति मन्यामहे। तत्रैवौघपरंपराव्यतिक्रमसाहसदर्शना
न्नाधुनाचारमात्राच्छक्यं धर्माध्यवसानमिति। पूर्वपक्षः। सिद्धान्तस्तु॥ धर्मबुद्ध्या वैदिकैरनुष्ठानमसति
वैदिकत्वेऽनुपपन्नं व्यतिक्रमसाहसदर्शनं तु रागद्वेषादिनिबंधनत्वान्न धर्मबुद्धिनिबंधने धर्मबुद्धिनिबं
धनस्य चापरितस्याग्रहणमाप्यकारणत्वाच्छ्रुतिस्मृतिविरोधादर्शनाच्च धर्मलिंगादव्यभिचारः मन्वादि १२
भिः कलाधविवेके यदि नाम स्वरूपेणानिबंधनः सामान्यात्मना शिष्टाचारः प्रमाणमित्येवमुक्तं

शिष्टाचारः प्रमाणं धर्मबुद्ध्या वैदिकैरनुष्ठानमालात्

प्रत्यक्षशक्ति कल्पनायां दृष्टकल्पनाबीजमाह   तत्र निर्णयार्थं तात्पर्यज्ञानस्यापि कारणत्वेन प्रदर्शितं

स्या   = वि२ बला२

नैतावता कश्चिद्दोषः तस्मात् स्मृतिवदाचाराणामपि धर्मे प्रामाण्ये सिद्धे ते यद्दर्शनाद्विरोधस्य समावि
प्रतिपत्तिः स्यात् । आचार प्रसंगाच्छ्रूयते प्रयोगरूपाचार विंशरे प्रतिपत्तौ बलैर्वित्यतो अत्र भाष्ये आ
र्यम्लेच्छ विशेषानुपादानाद्वाक्यशेषेण सिद्धीत कल्पना शिष्टाचारस्य पूर्वप्रकृतत्वात् यत्र शिष्टाना
मेव मिथो भिधाने विप्रतिपत्तिः केचिद्वाक्यशेषानुगुणाः केचिदननुगुणास्तत्र तुल्यबलता माशंक्य वाक्य
शेषानुगुणा यावजीयसं प्रतिपाद्य तदिति तदुदाहरणत्वावाद्यवादिशब्दानां दीर्घशूकादिष्वेव सर्वलि
ङ्गप्रयोगादन्यस्य विप्रतिपत्ति विप्रतिपत्ति विषयोदाहरणं स्याद्दर्शनात् सन्दिग्धेषु वाक्यशेषादित्यने
न गतप्रायत्वात् वाक्यशेषाद्वा निर्णयस्ततो सति वाक्यशेषे पीलुकानेति ह युक्तं प्रतिज्ञा श्रुत्यव
लत्व प्रसंगादयुक्तमिति मत्वा आचार्यैरन्यथाधिकरणं व्याख्यातं । यत्रार्य म्लेच्छयोरभिधाने विप्रतिप
त्तिः । यथा पीलुशब्दः मार्यहस्ति विशेषाद्वृक्षविशेषे ह्योरपि शब्दार्थत्वे यद्यपि विना दिव कारणमेव धारस्य र
ीतदपि समानं म्लेच्छैर्यपि तस्मात् समेधामभिधानं प्रतिपत्तिः स्यादिति प्राप्ते विधीयते प्रतिपादकतामात्रे
म्लेच्छैर्यवगम्यते । अविप्लुतस्तु शब्दार्थः शिष्टैरेवावधार्यते । ... उभावपि शब्दार्थाविति अने
कादृष्टशक्ति कल्पनाप्रसंगात् शब्दप्रयोगोपि चान्यतरस्य ... धारणाद्व्यवहारानुपपत्ति प्रसंगात्तु
कदाचित् कस्यचित् उपादाने शब्दो विकल्प्यापत्तेरेकत्वम् स्यचेनान्यत्र गौणत्वेनापि प्रयोगोपपत्ते
विशेषे प्रयुंक्ते । म्लेच्छास्तु हस्तिनि तत्र विंत्यते । किं तु तुल्यबलत्वमुतार्यप्रसिद्धि ... सीति । लोकप्रसिद्धिमभ्युत्वा शब्दार्थस्यानयोरपि सम ।
विप्रतिपत्तिः स्यात् शास्त्रार्थादिबलाबलं । शास्त्र ...
व्यवहारगम्यस्तु शब्दार्थः सवास्ते ... नियोगशालिना मार्याणामस्ति बलीयस्

गौणी तपि प्रयोगे पार्श्वस्थानी मुख्यानि धर्मसंज्ञया तौरेवचान्येष्यो मुख्यस्य कल्पना मुख्यानि धान परी त्य
तुष्टिसंज्ञया तत्र यदि न कथंचिदपि विशेषावधार्यते तत्रगत्यन्तराभावाद्वयोरपि अभिधेयता स्याद्वा आस्ते स्व
नियुक्तानस्ति युक्तयो विशेषः। शास्त्रस्था हि शब्दैकसमधिगम्य धर्माधर्मा विलुप्ति लिप्सया शास्त्रार्थं त
द्विविचित्य परिपालयन्ते। मूलभूतस्य दृष्टार्थं व्यवहारस्य यथा कथंचिदपि सिद्धेः प्रयोजनाभावात्त्राविहु
तिसिद्धो यतन्ते। अतो यद्यपि प्रतिपादकता मात्रेऽप्यपि सिध्यति तथापि विलुप्ति संज्ञया नैतेषु शास्त्र
यत्नव सिद्धिरित्यार्य प्रसिद्धत्वेन विदूषितया बलीयस्यार्थसिद्धिरिति पील्वादिशब्दानां म्लेच्छप्रसिद्धि
धायिन इति स्थितं। नाध्ययनमध्यापनं म्लेच्छ दिनामाविशार्यैरुच्यते। वाक्यशेषोऽन्यथा यथेलोकेन ग्र
हुतयेति। स्मृत्याचारविरोधेवा यत्र मूत्रपुरीषोत्सर्गादि निबंधनानां निबंधनानी आचाराणां विरोधो मा
तुलसुतापरिणयनादिषु तत्र किं तुल्यकक्षत्वमुत स्मृतीनां बलवत्त्वमिति चिंत्यते। बलाबल विरो
धश्रुतौ क्षीनरितकारितः। श्रुतिस्मृत्योरिह त्वैनद्वयोः श्रुतिमूलत्वात्। श्रुत्याहि साक्षादर्थः प्रतीय
ते। स्मृत्या तु श्रुतिकल्पनया त्वेकान्तरित प्रामाण्याद्व्यवहित प्रामाण्याच्छ्रुतिर्बलीयसीति तेन तत्र युक्ते

५२

यत्स्मृतेरनुष्ठाने लक्षणाप्रामाण्यं। इह चैवं विशेषो नास्ति द्वयोरपि श्रुति मूलत्वे नैकान्तरितयो
राविशेषात्। यस्मात् समाविप्रतिपत्तिरिति उच्यते। सत्यं यत्प्रणीता हि स्मृतिः सोपनिबंधनात्
स्यात् न बलीयस्त्वमाचारात् निर्निबंधनात्। प्रत्यक्षितराहि मन्वादयः स्मर्तारः तत्स्मरणे गुणाच
तर कर्तृ वादित्तर आचरित्वा हि प्रोजनीयतरमिति व्यक्रमेतत्। अपि वाचरितृणां जनानां स्व
यमित्स्वतो विप्रकीर्णप्रकरणादिगत कृत्स्न करणे नार्थ प्रवृत्ति पद्ममसामर्थ्यादेव उपमेत्व म
हर्षिभिरेव शाचारस्मृत्वा समर्पितमर्थमनुतिष्ठतीत्यंगीकार्यं अत आचारस्य स्मृतिकल्पनेन श्रु
तिकल्पनेव मिति द्वयन्तरित प्रामाण्या दुर्बलत्वं। अपि चाचारेषु कर्मस्वरूपमात्रमेव प्रत्यक्षीकर्तव्य
ता विमर्शपूर्वमर्थ सुख हेतुतरासंभव निरूपणेन परिशेषात् कल्पयितव्या। तेन कल्पयित्वा पश्चात्
मूलकल्पनमिति विप्रकर्षः। सन्निबंधनास्तु स्मृतिषु प्रागेव ग्रंथतः कर्तव्यता गम्यते। मूलमात्रं कल्प्य
मिति सन्निकर्षः। सर्वेषां च स्मृतिविरुद्धाचाराणां मातुलदुहितृपरिणयनादि विषयाणां कामादि हेतु
तरं विस्पष्टमेव दृश्यत इति न कथं चित् श्रुतिमूलत्वं संभावनीयं। न चात्र विकल्पाभ्युपगमे नानयोरपि प्रा
माण्यं संभवति। वक्ष्यति वक्यासैनवात्र न [illegible] मातुल दुहितृ परिणयनात् प्रत्यवायोत्पत्तिरनुत्पत्ति

[illegible]

त्रि३

स्य सन्निवृत्तिः। अथ तत्र यमन्यतरस्याप्रामाण्यमा... प्रणीयी। तत्र गृह्यमाणनिमित्तस्याचारस्याप्रामाण्यमि
ति सिद्धमेवं जातीयकानी उदाहार्यं वा। अथवा वृद्धव्यवहारादौ यत्र लोकवाक्यशेषयोः स्यविषु प्रतिप
त्तिः। यथा त्रिवृद्बर्हिः प्रचमानमित्यत्र त्रिवृच्छब्दस्य त्रैगुण्यं लोकादर्थो वज्ञायते वाक्यशेषात्तु स्तोत्रीयानव
कः। आदित्यः प्रायणीयः पयसि चरुरिति। चरुशब्दस्य स्थाली वाक्यशेषादोदनं आश्ववालः प्रस्तर इति अ
श्वस्य वालः। वाक्यशेषात्तु काशानि एव सर्वो विधृती इक्षुरस्थवयवात्मिके वाक्यशेषात्काशमूलके। तत्र
किं लोकवाक्यशेषयोः स्वस्वबलत्वं उत वाक्यशेषा... प्रतिपत्तिर्बलीयसीति संशयः। तत्र पदार्थपदसं
बंधे तु तुल्यत्वं लोकवेदयोः। अदृष्टसाधनत्वे हि लोकाद्वेदोऽतिरिच्यते इति। विधकदृशान्तावदेतावदव
गम्यते। तत्र लोकस्याल्लिघय निर्णये वेदवाक्यशेषतुल्यत्वं। ततो विकेवा सामर्थ्यमस्तीत्यर्थद्वयम
पि तुल्यप्रमाणकत्वात् विकल्पेन गृहीतव्यमिति पूर्वपक्षः॥ सिद्धान्तस्तु वाक्ये कर्त्तव्ये विधिकस्या वि
बये क्या दृतेना हि तेनात्र वाक्यशेषस्य प्रतिपत्तिर्बलीयसी। यदि लौकिकोऽर्थो विधकदृशो नाश्रीयते न्या १४
थे वाक्यशेषान्यायेन विधकदृशा इति न कर्त्तव्यस्य संबंधः स्यात्। तस्माद्यत्र वाक्यशेषं त्रिवृद्बर्हिष्यवमा
नमित्यादिषु तत्तदनुगुण एवार्थः। समाप्तश्च लौकीय एतावदिहाधिकरणे स्थितं। यदा चैवं वाक्यशेषकात्

पदिरूढैर्वृषादिशब्दैः जिवयं तद्वाक्य... न्चयीतिति तस्या जिष्वयमन्यतो वगंतव्या। दशमेत्र रूढदस स्तोत्रिया न नकार्थेस्य स्यो
स्तोन रूढ्य मते ह्याह २

एतदधिकरणध वाजिन २

स४ छुद्रान्नि १

साण्डिल्यानकक मपिवाच्य मित्यवधारितं तद्वाय यत्रवाक्यशेषो नास्ति चित्रं दुर्ग्निष्टोम इत्यादिषु तत्रापने
नैवार्थे नजवितव्यं। रूढिवत्प्रदिति दशमेव क्ष्यते। यवरुशब्दयोर्ष्योदन स्थाल्योः परस्पर संबंधि चाधा क्य
शेषावधारितो दनवचनं वेन स्थाल्या मव्याप्याने कार्थत्वशक्ति प्रतिबन्धवा ल्लाक्षणिकः। तेनास्त्वपि वा
क्यशेषे सोऽयं चिरं निर्वपेदित्यादो अदनवचनमेव सिद्धत्रामेवक्ष्यते। आ [illegible] वालेचा वीत्राह्लावपिका
शतन्मूलयो रुद्रचा दन्यत्रापि तदर्थविवन्नतः। नचात्र संदिग्धेषु वाक्यशेषाच्चित्यमेन गम्यते अस्ति दे
हात्वा इह हि वाक्यशेषात्प्रागर्थान्तरमेव निर्णीतं वाक्यशेषेण तु बाध्यते न तु प्रथमं संदिग्धं तेन निर्णीयि
तइति। ।चोदितं तु प्रतीयेताविरोधात् प्रमाणेन॥ आर्यप्रसिद्धिविरोधे म्लेच्छानां प्रामाण्यमुक्तं इदा
नीं म्लेच्छप्रसिद्धिरित्येवाप्रमाणं उत यत्र बाधविरोधा देवाप्रमाणी अविरोधे तु तस्या अपि नवत्येवा सिद्ध
य निर्णये प्रामाण्य मिति चिंत्यते। पिकनेमसत्तामरसा [illegible] हि नह्यविद्वांपर्णां प्रसिद्धार्यं म्लेच्छानी
तु कोकिलादिषु प्रसिद्धिः तत्र यद्यप्रमाणमेव म्लेच्छप्रसिद्धिस्तर्हि पीलि रूढादि वन्नोन्यार्थकल्पन मयत्न
सा प्रमाणी ततः सेवाश्रयिष्यते। तदत्र म्लेच्छप्रसिद्धिः। आप्रामाण्ययोग्यानवत्येताव [illegible] दधिकरणे शारीरं
सत्यपि तु प्रामाण्ये किं म्लेच्छगतत्वात् दुर्बला निरुक्तादिद्वारा तु शास्त्रस्थत्वा द्बलीयसी उतायमेव

प्रसिद्धेर

ह्रा४

उर्वला कल्प्यत्वात् म्लेच्छप्रसिद्धेस्तु क्लृप्तत्वात् बलीयसीत्येतत् प्रासंगिकं। शास्त्रकोपवस्थितस्वरूपमेव ब
लाबलं प्रमाणद्वारा न्याय इति। तेनैव न्यायेनात्र प्रयोगद्वारा बलाबलात् क्लृप्तकल्प्यत्वेन स्वरूपगतमेव
न्यायोऽनुवृत्तितेन गत प्रायमि हप्रसंगात्त उक्तं भाष्यकारेण प्रामाण्यं संभवासंभवमात्रं तु म्लेच्छप्रसिद्धेरित्य
ते तत्र पूर्वपक्षः। म्लेच्छेषु हि पदार्थानां विप्लुतिर्भूयसी यतः। तत्र तेषु प्रसिद्धेर्येन विश्रंभः कथं च न। पदानि
पदार्थाश्चापभ्रंशप्राया एव म्लेच्छेषु कथमिवा विप्लुतपदार्थावधारणे। अतोऽप्रमाणं म्लेच्छप्रसिद्धिः। न हि तद्द
ष्टार्थव्यवहारे विवादः पदार्थविप्लवे यत्नैरुवर्तते। तस्माद्विप्लुतिसंभवात् तेषु प्रसिद्धार्थानिर्णयः। निरु
क्तादिद्वारेण वर्थकल्पनं पिकादीनामिति। ॥सिद्धान्तस्तु॥ ॥ पदानि तावदेतानि वेदादिष्वेव दर्शनात्। अवि
प्लुतानि तेषां स्याद् व्यवस्थितेन केनचित्। नित्येनार्थप्रसंगो नास्ति यतो म्लेच्छेषु विप्लुतिः। म्लेच्छप्रसिद्ध एवार्थस्ते
षामिति हि निर्णयः। पिकादिपदानि तावद्वेदतदंगादिषु दृष्टत्वाद्विप्लुतानि तद्देवी नित्येन केनचिद्दर्शनेन वि
तव्यं नवा मीमांसामार्गेष्विवार्थः। कश्चिदस्ति यत्र मुख्यानि त्वा म्लेच्छप्रसिद्धे गौणत्वात्यादि निमित्त
मौज्झि विप्लुतिर्म्लेच्छेषु न स्यसति मुख्यगौणादि संभवात्तस्मान्म्लेच्छप्रसिद्ध एवार्थो मीमांसामित्यवसीयते। अतः
सिद्धमविरुद्धेषु प्रसिद्धवाचकत्वेषु म्लेच्छानामभिधेयनिर्णये प्रामाण्यं॥ ॥ प्रयोगशास्त्रमिति चेत्॥ ॥ १४

न्यायुक्त्येन तेषु

नीमाधामपेमादीन: तत्र स ॥ अनुपयोगस्य मात्रेणस्य चकल्पयेवोधायनी मायोयं धासेनेकल्यो: एतानिषिध्य मनसानक्षते अर्थं पादग्रहणादित्यादि स्मृतान संज्ञा परिभाषादीनाम्. प्रयोगस्य स्मृतिकान्याम्भ लायनी यादीनि स्मृताणीति विवेकः ।
स्मृति विहितस्य ०

वेदमूलकत्वाभावे नैयर्थ्यम् २ सि से ४

त्वा अत्र कल्पसूत्राणि कदाचित्त्य किंप्रमाणमप्रमाणमिति न्याय्य विचारितौ। ननु स्मृत्यधिकरण एव सर्वेषां वेदत्ति
ल्लिनानी प्रामाण्याप्रामाण्य चिंता तत्र केचिदाहुः। तत्र शाखत यादृ वसापद्म मुक्ता शद्धानुमानेन सिद्धी
लितौ तानि वैदिकार्थनिबंधनत्वाच्च प्रत्यक्ष शाखानीति तत्रोदाहरणं स्मृतयो हि प्रायेण तस्मृतोपि प्रकी
देशान गर्णा परप्रकरण परवाक्य शेषगत प्रसिद्धवन्नि देशानुपपत्त्या हित्त प्रायविधिमूलाः तदध्यानयनं द
क्षिणौ दीक्षितः हूर्वमेके। सर्वो हि मनुष्याः हूर्वमिजतइति प्रसिद्धवत् सव्यस्य हूर्वमिजनं निर्दिष्टं तद्धदृ कल्पितानि
ष्टप्रयोजनाभावात् प्रमाणीतरेणाप्राप्तमित्यनुपपत्त्या विधिः कल्प्यते तथा स्मात्तावपि वध्यां त्रपन्नीमप्रय द
क्षेति तस्मा कृतेणा विज्ञातेन ब्राह्मण हत्येवं भूतं स्मृतीनां मूलं। अतएव चेषु स्मार्त्तप्रसिद्धिः प्रत्यक्ष प्राप्त प्रतिदं
च विहितत्वात् दर्शपौर्णमासादिषु उत्पन्नस्य प्रविधिसद्भावा श्रोतत्वं इममेव च विशेषं मनिप्रेत्य गोतमे
नोक्तं प्रत्यक्षविधानात् गार्हस्थस्येति नतु स्मृति परंपरयैवानुमेयत्वं अंधपरंपरादोषप्रसंगात्। अनन्त
स इव व प्रत्यक्ष विरोधे स्मृतेरनुष्ठानी स्मृतयो हि निर्देशानुपपत्ति कल्पितविधिमूलतयापि संभाव्यंतेक
ल्पानां च प्रत्यक्ष श्रुतिविरोधेनुपपन्ना तेनाविरुद्ध विषयवद्विरुद्ध विषयेपि न्यायान्यासेन विधिः कल्प्यपि
वाक्यमिति स्मृतिपरंपरयैवानुमेयत्वं अंधपरंपरासंगदोषप्रसंगात् अतएव प्रत्यक्ष विरोधे स्मृतेरनुष्ठानं स्मृतयो
मा दलमध्यस्य द्विदेवसमहेम्पो यहणं सार्थवादकं भक्षयते देन

लिनिर्देशानुपपत्तेः कल्पितस्य विधिमूलतया सिद्धेः स्मृतेः कल्पनाया प्रत्यक्षश्रुतिविरोधेनुपपन्नत्वेन
विरुद्धविषयवहिःस्थविषयेषु न्यायानामनेन विधिकल्पनेन चिन्ता किमिति स्मृतिषु प्रवृत्ता किं वाग्निहोत्रेषु
क्रियादावयं तेक निःशेषु सदेत्यादिवत् प्रत्यक्षमेव विधिदृष्टेति विधिकल्पोपजननात् यत्वा विषय प्रत्य
क्षविधिर्नोपलभ्यते तावत्तदनादरेण प्रत्यक्षोपलब्ध एवानुष्ठेय इति तेन स्मृत्य एवोदाहरणीः कल्प
सूत्राणि किं त्वनिषामिह प्रामाण्याप्रामाण्यचिन्ता किं तु स्वातन्त्र्याणामेव वेदवत्प्रामाण्यमुत स्मृतिवत्प
रतन्त्राणामिति । यद्यप्यनवतुनामेषामपि न तत्र विचार शेषामपि तु मन्वादीनां किं स्वातन्त्र्य विचारणीयं अथ
वा मन्त्रोदाहरणेन तेषां हि षडंगमक इति वेदवत् स्मरणात् स्वातन्त्र्यशंकाज्ञायते अथवाज्ञावयादिग्रंथानी
श्रुतिमूलत्वेन प्रामाण्ये निरस्ते सति प्रत्ति श्रुतिवदेव प्रामाण्यमाशंक्य निराक्रियते तदेतानि चर्चावार्यपि विवा
16 रस्थानानि समानन्यायानि सह विचार्यंते किमेषां स्वातंत्र्येण प्रामाण्यं न वेति तदर्थं किमेषां पौरुषेयत्वमप १६
पौरुषेयत्वमिति चिंतनीयं तत्रावगत्तिस्त्रावदेते न्यो धर्माधर्मविषयाः समुपजायन्ते साक्षात्स्वतन्त्र प्रमाणानि तथा दि
वर

कल्पसूत्रमन्वादिवचनानां शास्त्रादि
पातोऽर्थः

कथमनित्यानां नित्यविधिविषयत्वमिति तस्मादेषां नित्यविधिविषयत्वात् स्वातंत्र्यमिति २

पौरुषेयत्वे शाक्यादिग्रंथानीतत् पौरुषेयदोषाद् प्रामाण्यवान्यते दृष्टप्रामाण्यहानिः स्यात्। अतो दृष्टानुगुणादपौ
रुषेयत्वं मन्वादीनीत्व विगीतमेव प्रामाण्यं तत्किमेषामेवापौरुषेयत्वं कल्प्यता मुतमानीतरं कल्प्यिवा तस्य नि
त्यत्वमिति। दृष्टानुसारित्वात् नित्यत्वं कल्पनी न्याय्यः। अंगानां तु मंत्र ब्राह्मणयो र्वेद नामधेयं षडंगमेक
इति स्मरणात् इदमेवापौरुषेयत्वं कल्प्य सूत्राणां तु पठितपाठ प्रत्यक्षवेदाद्यपि पिवि बोधनात्कास्यीतर उच्य
त्वाद् पौरुषेयत्वे न हि सकल्पनप्रत्यक्षवेदवाक्यार्थ विषयमर्थं वदतामेषां पौरुषेयप्रणयेनैसं नवति
बोधनमशाकादिति स्क समाख्याकवादि नत प्रवचननिमित्त त्वेनोपपन्ना तन्निमित्तात्वेषु लौकिकानां
कर्तृस्मृतिः। नवति जात्र प्रयोगः। बौद्धाध्ययनं सर्वं गुर्वध्ययनपूर्वकं बोद्धाध्ययन सामान्यादधुनाध्यय
ने यथा। कल्पानीतु नित्यब्रह्मयज्ञविधिविषयत्वोपि नित्यता श्रूयते य ब्राह्मणानीति हासान्
पुराणानि कल्पानिति प्राप्ते ब्रूमः। नैते षां पौरुषेयाणां स्वातंत्र्यमुपपद्यते। विस्पष्टपौरुषेयत्वे दृढकर्तृ
स्मृतेर्वंशात् पुरुषपरंपरयैव ह्येषु कर्त्तारः स्मर्यन्ते। न कठादिवत् प्रवचनेन परिहर्तुं शक्यंते तत्र समा
ख्यामात्रं अत्र तु पारंपर्येण सर्वेषामविगीत स्मरणात् न नित्यत्वं संनवति। षडंगमेक इति परमेत्यापन्या
सात् पूर्वपक्षोक्तिमात्रं नानाशाखागत क्रियादि कल्पित क्रमत्वयोपि संहारस्य कल्प्यसूत्रानपेक्षैः

कर्त्तुमशक्यत्वात् तादृर्थ्ये नार्थनिबंधनं नानर्थकं । एवं विधा अपि ग्रंथा8 अतिमन्वंतरं क्रियमाणा8 केनचित् स
र्वकालमविच्छिन्न पारंपर्येण प्रवर्त्तते । तेच वेदार्थ कल्पनात्कल्पा इति नित्यपयैव समाख्यया अल यज्ञा
तया विधीयंत इति अनित्यत्वेपि ग्रंथव्यक्तीनां नित्यविधिविषयोपपत्तिः । तस्मान्नेषां स्वातंत्र्येण प्रा
माण्यं । इति शाबराद्दि निबंधनानां सिद्धं धर्मे प्रमाणत्वासत्वं । कल्पादिषु यानि प्रत्यक्ष श्रुतिविरुद्धानि व
चनानि तेषामप्रामाण्यं यथा अविशेषात् इन्द्रो वेति सर्वपुरोडाशचतुर्द्धाकरणवचनं सन्निहितत्वेन शास्त्र
माग्नेयं चतुर्द्धा करोतीति । तथा सद्यः कृता कृत इति । सवनीय पुरोडाशस्य विकल्पवचनं पूर्वपक्षमूलं न व
चनमूलं । अन्यत्र तदर्थवाद वचनादित्याश्वलायनवचनात् । तथा याज्यपूर्वेदि मुद्धंतीति वेदे
र्यूपांगवचनं । जाघनीलिंग पत्नीं संयाजयंतीति जाघनीनां समुच्चय वचनं द्वादशाधिकरण पूर्वप
क्षमूलं नवचनमूलं । तत्रापि सन्निहित शास्त्रं जाघन्या पत्नीं संयाजयंतीति विवक्षितैकत्वमुपादेयगत
त्वादिति द्वादशे वक्ष्यते । यथा पुरोडाशं पर्यग्निकरोतीति सन्निहिते शास्त्रे सर्वाणि हवींषीति वचनं दश
माधिकरणपूर्वपक्ष मूलं न वचनमूलं । पशु8 पुरोडाश विकारस्य स्यात् पर्यग्निकरणदर्शनादित्यस्य विधा
नात् इदममुक्तं सर्वप्रयुक्तं सर्वत्र प्रयुक्तत्वात् सन्निधान शास्त्राद्वेति । अनुमान व्यवस्थानात्तत्सं

गृह्यादि मानवातिरिक्तस्मृतयः केषांचिदेव नाखिलपर्यन्तेन सर्वैः ॥ ३

तदुक्तं प्रमाणीस्यात्। स्मृतीनामाचाराणां च विरोधाविरोधयोः प्रामाण्याप्रामाण्ये प्रतिपादिते स्वातन्त्र्यं च
स्मृतीनां निरस्तं इदानीं केषांचिदाचाराणां स्मृतीनां च व्यवस्थावानेति चिन्त्यते। होलाकाद्ययो हि प्राच्यादि
मानि निरनुष्ठीयन्ते ... तदेतानु स्मृत्याचारानुदाहृत्य चिन्त्यते किन्तेषामेव धर्मः किंवा सर्वेषामिति
तदर्थं च किन्तेषां मूलभूता श्रुतिर्व्यवस्थितविषया शक्यते कल्पयितुं उत साधारण्येनैवेति। तत्र लिंग
व्यवस्थया लिंगी व्यवस्थां प्रतिपद्यते। धूमो हि यत्र तत्रैव वह्निरनुमीयते। स्मृत्याचारलिंगगम्या
श्रुतिर्न प्रत्यक्षा तल्लिंगं केषुचिदेवोपलभ्यते। अतस्तद्विषयैव श्रुतिरनुमातुं शक्यते। न हि तस्याः
सर्वविषयत्वे प्रमाणमस्ति व्यवस्थितविषयत्वे हि स्मृत्याचारयोरुपपत्तेः। यदि तु साधारणी श्रुतिः
स्यात्तदा कृत्स्नौ स्मृत्याचारावपि सर्वपुरुषगामिनौ स्याताम्। तस्माद्व्यवस्थितमेवाधर्मत्वमिति प्राप्तेऽभि
धीयते।। विशेषाभावमात्रेणासिद्ध्येत् सर्वधर्मता। विशेषणाद्व्यवस्था स्यान्न ब्रूमो ह्युपपद्यते। यत्तु
क्तं सर्वधर्मत्वे प्रमाणं नास्तीति तदयुक्तं नहि सर्वधर्मवादिना प्रमाणमुपन्यसितव्यं। उभयवादिसिद्धे
न विधिनैवासति विशेषोपादाने सर्वधर्मत्वसिद्धेः। व्यवस्थावादिना तु वक्तव्यं विशेषप्रमाणं तन्ना
स्ति तथाहि स्मृतय आचाराश्च साधारण्येनैव विदधति न तेषु नरादिविशेषोपादानमस्तीति स्मृत्यनुसा

येव श्रुतिकल्पनं प्रेति सा धारणी व्याख्या। पवन यतस्थानु कर्तुं संवरणं वात। कर्ता हि छंदोगः स्वशिष्या
नः छंदोगान्स्वग्रंथमध्यापयामास तेषु न्यायः छंदोगा। नित्येवं गो तमीयस्य छंदोगा। ४ पा० ४। तथापि स्त्री बादि ग्रंथ
स्य तैत्तरीयेरेवं ग्रंथेष्वाना मपीति व्यवस्थित धर्म विषय व्रुमप्रमाणकी। आचाराणां तु सर्वाचरित धनु
गत मनाचारित स्पष्ट व्यावृत्त माकृति यक्ति गुण संस्थानादिकं न किंचि द्विरोबरी भवति यत् समादाय
त्। चिरचिनिर्गत पुत्रपौत्राणामपि अस्मत् समाख्या यामाचारात् तस्माद सति विशेषणे सर्वधर्मत्वमाचा
रणी स्मृतीनां चेति ॥ ॥प्रयोगोत्पत्यशास्त्रत्वा छन्दे पुनर्व्यवस्था स्यात् ॥ स्मृत्याचारविरोधे स्मृतेर्बलीय १८
स्त्व माचारे धर्मि युक्ताचारस्य बलीयस्त्वं स्थिती। इदानीं शास्त्रापशास्त्र किमार्गो पिकिं व्याकरण स्मृते स्वदन्ति युक्ता
गस्य द | चा मोचारस्य चेतर लोकव्यवहारात् बलीयस्त्वं संभवतिनवेति विचार्यते। तदिहे कस्मिन्नर्थे प्रयुज्यमानान्
गोगाव्यादिशब्दान् व्याकरणानुगताननुगतांश्चोदाहृत्य चिंत्यते किमेते सर्वे कस्मिन्नर्थे प्रयोक्तव्याः स्युः साध
व४ किं व्याकरणानुगता एव साधवः अन्येन साधवो न प्रयोक्तव्या इति किं सर्वे ऽविच्छिन्न पारंपर्यात्तके ८
विदराक्रिजा अपभ्रंशाइत्यर्थः। तदर्थं किं व्याकरणं प्रमाणमप्रमाणं वेति चिंत्यते तत्र सिद्धयेव किमस्य

तदर्थंवर

मूले संभवति नेति। मूलसंभवे प्रमाणभूतव्याकरणबलीयस्त्वेन तदविरुद्धपुरुषाचारबलेन च ह्यस्य गवाचारबा-
धाद्गवादीनां साधुत्वं निर्मूलत्वे तु तदप्रामाण्यात् लौकिकप्रयोगाविशेषात् सर्वेषां साधुत्वेन प्रयोज्यतेति तेन व्या-
करणप्रामाण्यप्राधान्यमेवात्र चिंतनीयं। तत्र हि निर्मूलत्वात् विगीतत्वात् नैःफल्यात् त्वदेवबाधनात् दृष्वपि...
र विरोधाच्च नास्य प्रमाणसंभवः। तस्मादेतेन सर्वेषां शब्दानां प्रयोगो नियम्यते। तेनार्थप्रत्ययात् सर्वप्रयोज्या-
न व्यवस्थया। नियमद्वयार्थं हि व्याकरणं साधूनेव प्रयुंजीत नासाधूनित्येकः प्रयोगनियमः गवादय एव सा-
स्वरूपद् ध्यवो नगाव्यादय इति साधुत्वं नियमो परः। न चैतद्द्वयमप्यनेन निर्णेतुं शक्यते। तथा हि न तावत् साधूनेव
प्रयुंजीतेति नियमसंभवः। अर्थाय हि शब्दोच्चारणं न धर्माय अर्थश्च यद्यसाधुभ्योऽपि गम्यते तर्हि साधुनिय-
मो नर्थकः। अथ न गम्यते ततः सुतरां नियमशास्त्रानर्थक्यं अर्थवशादेव नियमसिद्धेः। अर्थगम्यमानेऽप्य-
साधुभ्योऽर्थे अदृष्टार्थमपि शब्दप्रयोगमाश्रित्य धर्माय साधुनियमः शास्त्रेण क्रियत इत्युच्यते। तन्नामू-
ला संभवान्न तावदत्र प्रत्यक्षादीनां मूलत्वं तेषां धर्माधर्मयोरप्रवृत्तेः। न च वेदवाक्यानि गवादिषु प्रवृत्तिपरं क-
ल्पयितुं शक्यते। अनंतवाक्यपाठासंभवात्। अपठितानां च मूलत्वानुपपत्तेः। न च सुशब्दं प्रयुंजीत
नापशब्दं इत्येकेनोपलक्षणेन सर्वेषामुपसंग्रहः। गवादीनामपि श्रोत्रग्राह्यत्वेन सुशब्दत्वात् व्यवस्थानुपपत्तेः।

वगमा ६ हे १

साधुत्वमेव ... प्रयोजनं ... साधनत्वमिदं साधनं ... व्याकरणस्य ... साधुत्वस्य ...

एप यावर

वा
नवीतरसामान्यं गवादिष्वनुगतं गाव्यादिभ्यश्च व्यावृत्तं किंचिदस्ति येन व्यवस्था स्यात् । साधुत्वमिति चेत् किंपु
रिदेर नः साधुत्वं यङ्, चादिष्वेवं स्थितमित्युच्यते न हि प्रत्यक्षादिभिरवगम्यते । वाचकत्वमिति चेत् गाव्यादिष्वपि
विशिष्टं तेषामपि हि प्रयोगप्रत्ययानुपपत्त्या वाचकत्वं लोके गम्यते न ह्यवाचकानां प्रयोगः अर्थप्रत्यायकत्वं वा घटते ।
स्व पचादीनामिव प्रियंग्वादिषु गुणात् प्रयोगसंभवः । मुख्याभावान्मुख्यपूर्वो गौणः नासावस्तीत्यवाचक
स्य गाव्यादेरेव कल्प्यते तेन लक्षणप्रत्ययो तेन गाव्यादीनामवाचकत्वं लोकविरुद्धमिति न शास्त्रेण साधुनि
रूपणं निर्यत्नु शक्यते । अनादित्वं साधुत्वमिति चेत् तदपि गाव्यादिष्वपि विशिष्टं तत्रापि संबन्धस्मरणात् । अदृ १९
ष्टसाधनत्वमिति चेत् नैतस्य प्रत्यक्षाद्यविषयत्वात् द्वेवा वाक्यानां च प्रतिपदं संभवात् उपलक्षणानुपलक्षणत्वे
साधुत्वमेवोपलक्षणं तदेवत्व प्रमेयमित्यात्माश्रयदोषापत्तिः । तस्मान्मूलाभावादप्रमाणं व्याकरणं । परस्पर
विगानाच्च । सूत्रकारो ह्येवरूपवत्वं प्रयोजनमनभिदधानो वितत्ः प्रयोजनत्वाभावं शास्त्रस्य मन्यते । भाष्यवार्त्तिक
कारौ तु धर्मप्रयोजनतामिति विगीतत्वं तयोरपि मिथो ज्ञानपूर्वप्रयोगधर्मत्ववचनात् विगीतत्वं । निःफलं चे
दं शास्त्रं नह्यनेन धर्मार्थकाममोक्षाणां कश्चिदवाप्यते धर्मश्चेति चेत् तत्रापि पूर्वोक्तनिर्मूलत्वेनाप्रमाणत्वात् रा प्रमाण
न्वरक्षोहादीनामपि प्रयोजनत्वं तेषामन्यत एव शिष्याचार्यसिद्धेश्च लोकमीमांसादिभ्यः सिद्धेरिति । वार्त्तिक

भाष्यकारवार्त्तिककारयोः साधुशब्दज्ञानधर्मे ... भाष्यकारः ज्ञानपूर्वकप्रयोगे धर्म इत्यपरः ।।

इतिङ प्रमाणमंवाइदंदेवेभ्योर्जान २

व्याकरणेन संस्क्रियत इति चेत् अत्यंतविद्यमानत्वाद्वाक्यपदानां तद्द्वारेण वाक्य

त ते

एवं अपि चिती वेदविरुद्धे वेदे व्याकरणीहष्टी सामेत्यधिकृत्य कल्लेर्दशवामदेवाद्यश्चो इत्यकर्त्रौ। वेदेच यद कात्ल यत्र इ सप ५
कात्ले यैततो वसुवामी सम नवर्त्रं तस्माद्वामदेव्यमितिवेदवाधनादप्रामाण्यं स्यात् परविरोधाद्वा। अर्थेऽप्युक्तानांतु
शब्दानां व्याकरणं प्रति ज्ञातं वाक्यमेवतत्येष्टं नपदानि अनर्थकत्वात्। यथोक्तं ब्रह्मणाद्यो यथानास्ति कश्चि ब्राह्मण
केवलं देवदत्तादयो वाक्ये तथैव स्करनर्थकाइति ततश्च यथा प्रतिज्ञं वाक्यमेव व्याकरणेन संस्कर्तव्यं तदव्या
करणात् पदव्याकरणाद्य इत्यं परविरोधः। पदद्वारेण वाक्यमेवं विषाणद्वारेणेव शशस्य संस्कारासंभवात्त
स्मात् प्रमाणं व्याकरणं सर्वं नाधितव्या इतिप्राप्ते विधीयते। ॥ प्रयोगप्रत्ययोनाव वाचकत्वादृतेनपि हि॥ युक्तावेक
स्वचार्थस्य न्याये व्याना नेकता कृता॥ अनियुक्तस्मृतेश्चात्र स्याद्विशेषाव धारणी। स्मृतेः स्मृत्यंतरं मूलं सा।
प्रत्यक्षवचनाश्रवनीयवाक्यसमानता। प्रयोगनियमे मूलं वेदस्तस्मात्प्रमाणता। गवद्
एएवसाधवोनगाव्यादयः इति साधुस्वरूपनियमः साधवएव प्रयोज्या नासाधवइति धर्मार्थप्रयोगनियमइति
द्वौ नियमौ व्याकरणे प्रतिपाद्येते। द्वयोरपिच मूलसंभवादुपपन्नं प्रामाण्यं। तथाहि प्रयोगनियमे मन्वादिव
त्तत्प्रत्यय प्रवीणत्वात् वेदमूलत्वं नहि पाणिनिकात्यायनपतंजलिभ्यो न्यः कश्चित्प्रत्ययिततरो स्ति। त
स्मात्तत्प्रत्ययात् स्वनुमानं वेदवाक्यं प्रत्यक्षमेव वाजसनेयकादिषु वचनं तस्मात् ब्राह्मणेन न म्लेच्छितवे
म्लेच्छोहवाएषयदपशब्दः इति आहिताग्निरपशब्दं प्रयुज्य सारस्वतीमिष्टिमित्यादि प्रायश्चित्तविधानं। उत्तवः

शब्दान्सत्यासुशब्दाः योवान्

यथानुपपत्त्या

प्रयुञ्जीत स्याद्यस्य बहवो मंत्रवर्णाः शब्दाः अपशब्दविज्ञानान्निजिज्ञासद्गिज्ञ स्मृति निंदारूपार्थे इत्यर्थे इति शब्दप्रयो
गे तदाश्रितः साधुनियमो योजनाश्रित एव दिङ् इयमः शास्त्रेण विधीयत इति न प्रयोगो तत्र शास्त्र वाद्य
वस्था सत्यानृतवदनवर्जनयोश्च चिंतितमेव शास्त्रे वेत ब्राह्मणार्थनिर्देन हि चिर्धर्मेण यथेवाधी सत्यो यथास्थिता
र्थकथनं धर्मः तथा शब्दसत्यमपि यथावस्थितविस्तृत शब्दोच्चारणमित्यर्थः। यथा वाद्यानृतमन्यथावस्थि
त स्यान्यथा वचनं प्रत्यवायाय। तथा शब्दानृतमन्यरूपे वाचके सत्यन्यरूपोच्चारणमिति न प्रयोगोत्थं
तच्छास्त्रं वाक्यामेव वाक्यान्यी साधूनेव प्रयुंजीत। यथा साधून् पशब्दपर्यायानिति समस्तशा नते
स्त्रापशब्दविधि प्रतिषेधसिद्धौ नीतं तत्वाक्यकल्पनामात्रः। साधुत्वासाधुत्वे च शब्दसत्यानृतपर्यायेउ पशब्दे २०
पलक्षणे अन् वाचकत्वमेव साधुत्वं तद्विपर्ययश्चासाधुत्वं। यत्तु प्रयोगप्रत्यययोर्गाव्यादीनामपि वाचक
त्वाद्यवस्थानुपपत्तिरित्यत्र तत्रोच्यते। यद्यपि मीमांसा मते वाचकत्वं यद्यपि मुख्याभावे गौणलक्षणयोरसंभवः।
तथापि वाचकाशक्तिजतया मूलशब्दोपस्थापनेन प्रत्यायकत्वं न विरुध्यते। शक्तिजत्वापरिज्ञानाद्योपभ्रं
शंक्तो बालास्तत्रैव संसासंज्ञिसंबंधीशिक्षित्वा तथैव स्वयं व्यवहरंति। तेभ्यश्च शिक्षित्वान्यपीत्येवं प्रयोग
प्रत्ययोरुत्पत्तौ नैकांतः सर्वेषामविच्छिन्नवाचकत्वमध्यवसातुं शक्यते। संभवति चैवं नानेकशब्दत्व मे
कस्यार्थस्याकल्पयितुं न्याय्यं। अनेकशक्तिकल्पनप्रसंगात्। प्रयोगकल्लायी वाच्य विध दोषनिदानं चिकि

प्रमाणस्याप्रमाणत्वपरित्यागश्च कस्य नानृतशब्दवहाना

[तर] [कैर] [वेयःतद्यर] [मिर] [म]

त्यापत्तेः। वाच्यवाचकयोरप्येकस्यावधारित नियमस्यानेक चेवाधप्रसंगात्। सास्नादिमद्विग्रहियस्याभिधान [ने]
क्रियायां कर्मस्थो गोशब्दः करणमित्यनयोः सैंदि गाव्यादिरपि सास्नादिमान भिधीयते तत्र स्वीवेलायां
सास्नादिमत्त्कर्मिकायामप्यभिधान क्रियायां गोशब्दस्य करणत्वानावाद् प्रतीतबाधः। तस्मादेकस्यै
वेवाचकत्वमितरे तदशक्तिजा इतिन्यायः। करहस्तादिषु विशेषानवधारणात् अन्याय्यान्यनेक शब्दता गत्यं
तराभावादंगीक्रियते। गवादिगाव्यादिषु चानियुक्तस्मरणात् विशेषाद्यीति न तावत् सर्वेषां वाचकत्वे वा
चकरूपत्व नियमे स्मृतेः स्मृत्यंतरमूलं तस्यां अन्यदित्येव मनादिरेषा स्मृतिपरंपरा नन्वीघपरंपरा
न्यायः। शब्दस्वरूपस्य चाद्दीतराघिविकस्य प्रत्यक्षत्वात्। सर्वे स्वस्वकाले गवादि शब्दान् प्रत्यक्षत एवोपल
भंते। अतीतकालेव सत्वा पूर्वेन्योद्वृद्धेभ्यः श्रुत्वावधारयंति। सर्वकालमपिकेवनवृद्धाः संतीति प्रत्यक्ष सं
भवान्नकदाचिदपि प्रत्यक्षविच्छेदः। सर्वकालवर्त्तित्वमेवानादित्वं साधुत्वं तच्चाविच्छिन्न पारंपर्यादनियुक्त
स्मरणेन सुलभमितिनानिर्मूलत्वं। नचविगानाद् प्रामाण्यं श्रुतीनामपि ग्रहणाग्रहणादि विगानदर्शनात्। फलं
वास्य शब्दापशब्द विभागज्ञानं सुपादान परित्यागो प्रयोगे धर्माधर्म प्राप्ति परिहारार्थं रक्षोहादिवेदविरुद्धंका
मेनवक्तु अप्रमाणं। सर्वविशेषन स्मरणवत्मनतावता सर्वप्रिमाणं एवं पदानर्थक्य वाक्य स्फोटानुपपश्मापिन्या
यमूल इति न्यायाभावाद्प्रमाणं। धर्माधर्मसिद्ध्यर्थं च शब्दापशब्दविभाग कथन मनियुक्त प्रणीतत्वात् प्रमाण

अन्यत्वपदेस्यात् एकत्वं ५

धर्मभेदे १

मेवेति। ॥प्रयोगचोदनाभावा दर्थैकत्वं विभागात्॥५ प्रमाणं व्याकरणं तदनुगताएव गावादयो वाचकाइति
स्थितौ इदानीं वाचकप्रसंगात् वाच्यविशेषश्चिंत्यते। किमाकृतिं उत व्यक्तिरिति। तत्र यदि लोकवेदयोः शब्दस्वरू
पमन्यत्वं भवेत् ततइदमनारंभणीयं। तदाहि लौकिकशब्दार्थविषयं तावदधिकरणमनर्थकं वैदिकविषयं तु
भवत्यर्थवत्वात् नतु तत्र व्यवहारानुपातिनां शब्दानामर्थनिर्णयः शक्यते कर्तुम् उपायाभावात्। तेनात्र यस्मिन्
विषये नारंभएवाधिकरणस्यावैपक्षे तु लोके वृद्धव्यवहारानुसारेण कृतः शब्दार्थनिर्णयः तत्रानुप्रयुक्तो वेदे
फलिष्यति। तेनाकृत्यधिकरणोपोद्घाततया लोकवेदयोः पदपदार्थानामन्यत्वं नन्यत्वं विचार्यते। तत्र सत्यपि
वर्णभेदे केनचित्स्वरस्थानदसवर्णागमलोपविकारपर्याया। ध्यायानध्यायादिभेदेन उरा राजपदयोरिव क्रम
भेदेन व्यपदेशभेदात् स्पष्टभेदस्वरूपादि शब्दसाहचर्याद्वा लोकवेदयोः पदानामन्यत्वं। अर्थोपि च पदान्यत्वा २९
देव कुत्रानावे देवगवा वहन्तीति दर्शनाद्वा। आम्रवालादिशब्दानां स्वपर्यंतिरदर्शनात् अन्यइतिप्राप्तेभि
धीयते। प्रत्यभिज्ञानात्प्रत्यभिज्ञानाद एकत्वं प्रतिपत्ती। वर्णात्मकं पदं तच्च तदभेदान्न भिद्यते। ॥ननु वर्णभेदेपि स्वरादि
भेदात् पदभेदोपि वाक्याधिकरणेदर्शितः। पदावधारणोपायाद्वा कृतनिश्चितिसूत्रयः। क्रमन्यूनातिरिक्तत्व स्व
रवाक्यप्रतिसूत्री इति। सत्यैयोर्थे प्रतीत्यौपयिको धर्म स्तद्भेदे भिद्यत एव पदं यथा पूर्वपदप्रकृतिस्वरत्वे
स्वरादीनाम यि अर्थप्रतीत्युपयुक्ततयाद दकचंनस्वरूपेणाइइ अर्थप्रतीत्योपयिकधर्मभेदाभावात् नपदभेदइति परिहृति
अर्थेति
स्वरानियमादिकृते बुद्धौ वाक्यपदेशात्तदाहतेषु तौ भिन्न तेषु ॥ यपद

वा

स्वराणामर्थान्यः स्वान्यत्वनिपात २

बऊव्रीहिश्च मतोदात्तत्वेस्वार्थवृत्तिता स्मरणा दुक्ताम्यतो प्रलंबलक्षणा दि पुनुन्यूनातिरिक्तवशा दर्थभेदो लोकत
स्त्वावगतः। जराराजा दि पुनु क्रमादैन्यत्वाध्यवसायः। नैवं लोकवेद योरर्थो प स्थिकधर्मलिंदोऽस्ति यदिस्वनियतं स्वरा
णामिति स्मृतिलोकतोवगतेस्या त्ततो नियता नियत स्वरतया लोकवेदयोः पदभेदः। नचैवमतो नास्ति पदभेदः। पदं
तैर्नेन तिहिपद मतोमम करूपस्य कियतापि रूपेण सन्निधेदभिन्नं पदं तदनावेतु धर्ममात्रभेदा त्ततद्धिद्यते।
गम्यते ऽ४ एवं देवा सं [illegible] त्याद्दिषु लोकिकेऽन्योन्यनातिरेकवृत्त स्वरूप भेदे सत्यपि तद्रूपस्यार्थतिरानवगम्यात्। किंचि रूप
स:त्वने भेदेपि लोकिकपद प्रत्यभिज्ञानात् सत्यपिकेषांचिद्भेदेपि सर्वेषां भेदस्य प्रमाणकत्वात्। पदे केस्वतदर्थचिगमात्
उत्तानादिवचनस्यान्यपरत्वादस्य वालाद्यर्थ भेदेपि सर्वथा तदनावात्सिद्धमेकत्वं लोकवेदयोः पदार्थानां। एवं सि
द्धेविचार्यते किमाकृतिः शब्दार्थ उत व्यक्तिरिति। अथाकृति विशिष्टव्यक्ति रिति त्रयः पक्षाः प्राधान्यतश्चिं
त्यंते। अन्यातु विकल्प समुच्चय संबंध समुदायादयः सर्वपक्षा व्यक्तिविशिष्टाकृति पक्षनिराकरणेन निराकृ
तएव नवंतीतिनपृथग्विचार्यते। तत्र प्रयोगयोदनाम्नावात् व्यक्तेरेवाभिधेयता। नह्याकृतिमूर्तत्वाद्व्यवहारोपयोगि
नी। लिंगकारकसंख्यानां संबंधोस्यानकल्प्यते। सामानाधिकरण्यंच न जाति गुण शब्दयोः व्यक्तिवाभिव्य
क्तेतु सर्वमेतत्समंजसं। तेन शुद्धा विशिष्टा वा व्यक्तिः शब्दस्यगोचरः। व्रीहीनवहंति पशुमालभेत गामान
यश्राह्मणोनहंतव्यइति यार्थतएवमादयोविनाव्यक्तिमद्भ्यगोचराः प्रयोगविधयः प्रतिषेधाश्चते सर्वे

व्यक्तावेव संनिवर्तितेन ह्याकृतिरव हेतुमात्सम्बुमानेतु वा शक्यते नित्यत्वादमूर्तत्वाच्च तेनानर्थकं तदभिधाने प्रतिषेधश्च
प्राप्त्यभावाद्व्यक्तिपक्ष एवोपपद्यते। तस्माद्व्यक्तिः शब्दार्थः। एवं वृक्षो वृक्षाद्यादिदि व्यक्तौ प्रातिपदिकार्थे प्रत्ययाभि
हितानि लिङ्गसंख्याकारकाणि तयासंबध्यते जाते रलिङ्गत्वाद संख्यत्वाद मूर्तत्वेनाकारकत्वादसंबंधः स्यात्। सामाना
धिकरणं च शुक्ला [illegible] गौरिति शुक्लव्यक्तिवचनयोरेकार्थत्वादुपपद्यते। जातिगुणविशिष्टद्रव्यमुखेनैव विरो
याप धेनैदेसत्यपि विशेष्यभेदादुपपन्नं तत्पक्षे तु जातिगुणमात्रवाचित्वे दर्थभेदे दुर्लभं सामानाधिकरण्यं। एवं पुरु
षो देवदत्त इति जातिद्रव्यवचनयोर्दृष्टव्यं। तस्माद्व्यक्तिरेवार्थः। कथं तर्हि व्यक्त्यर्थं तरा। कथं तर्हि व्यक्त्यर्थं तरत्र
योगः। यत्र न दृष्टः शब्दः सामान्यस्योपलक्षणाद्दोषः। येव माकृतिकासैव गौरिति सामान्यमुपलक्षणीकृ
त्य त्रा छार्थशिक्षायोग्यं शुक्लवासाः स देवदत्त इति वक्ता। यथा तत्रोपलक्षणं मूर्तत्वासोन विधाय देवदत्तस्य वा
भिधीयते तथेहाप्युपलक्षणमात्रत्वात् सामान्यस्याभिधाने व्यक्तय एव शुद्धा अभिधीयन्ते एकोपलक्षणलाभा
देव नानेकशक्तिकल्पना परिहृता। आकृतिविशिष्टव्यक्त्यभिधाने तु न कश्चिद्दोषः। तस्माद्व्यक्तिरेव शुद्धा विशि
ष्टा वा शब्दार्थ इति नैतच्चारु। क्रुतं आनंत्यव्यभिचाराभ्यां शक्त्यनेकत्वदोषतः। संदेहाद्व्यवमशानाद्धित्रदुर्द्धेर। २२

नाचतः। अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः। आकृतेः प्रथमं ज्ञानात्तस्याश्चाभिधेयता। व्यक्त्या ह्यस्योपलब्धे
व्यवहारोपयोगिता॥ लिंगसंख्यादिसंबंधसामानाधिकरण्यधीः सर्वसमंजसं चैतत् तदस्यानेकान्तवादिनः। लक्षणाश्रि
त्यपेतव्याजाते स्तेनाभिधेयता॥ न हि अनंतासु व्यक्तिषु संकेतः शक्यते कर्तुं व्यभिचाराच्च व्यक्तीनामशाश्वार्थत्वे नि
यमलक्षणत्वात् संबंधस्यानियमे तदयोगात्॥ अनंताश्च राशयो नैतासु व्यक्तिषु कल्प्याः। जातिरूपलक्षणत्वे
व्यक्तिधेयानामनंतत्वाच्च तासामनंतत्वमस्येव। व्युत्पत्तिकाले हि जातिरूपलक्षणेनाभिधानसमये। अभिधानं हि ज्ञा
तिरिक्तेनैव रूपेण व्यक्तीनां। तद्यथा यद्यत्र यदेकापवरकस्थमपवरकास्थितिरूपेणोपलक्ष्य कश्चिच्चैकं विद्यात्
यथात्र स्थितेनापवरकेधुना सो स्ते स्त्रियशब्दाभिधेय इति तत्र यद्यपि व्युत्पत्तिसमये अपवरकस्थितिनामि कुसु
पलक्षणैर्लक्ष्यते। तथापि शब्दस्पंदनादरेण नेत्रमेव च स्वरूपेणाभिधत्त इति स्यादेव शक्यानंत्यं। अपि च यद्यपदे
दर्पि धर्मिरूपमभिधेयं ततो गोशब्दोच्चारणात् गो व्यक्तिः प्रतीयमानापि नाश्वादिव्यवच्छिन्ना प्रतीता स्यात् न
ह्यसाधारणमाकारमंतरेण द्रव्यांतरव्यवच्छिन्नं प्रतीयते। तत्र गोरित्युक्ते सर्वत्र विशिष्टा प्रतीतिः स्यात्
यथाहः। अन्यपदेरूपत्वेन सर्वत्राभिरोधप्रसंगादिति। अथाभिधानसमयएव जातिरूपलक्षणमभिधेयमिदं धदे
वद्धिव्यक्तिं शब्दो जातिमुपलक्षणमुपादाय तज्जातीयरूपेणाभिधत्ते गोजातीयमिति तत्तः प्रथम
भवतिरा क्तिः कश्चित्रियं एवमिहापि पयापि युत्पत्ति समये जातिरकाप्रलक्षणं भासात पापि शब्दस्तामसत्यत्ववनानारूपा व्यक्तीः
स्वेनरूपेणाभिधत्ता इति

जातिरभिधातव्या न ह्यनभिधाय जातिं तज्जातीयत्वरूपेण व्यक्तिरभिधातुं शक्यते। ततश्च विशिष्टाभिधानमेव
वाच्यो युक्त्यन्तरेणापर्यवसानाभिधाने विशिष्टाभिधाने च पूर्वतरं विशेषणमभिधातव्यं तदभिधाने च तत एवात्येता
विनाभूतव्यक्तिप्रतिपत्तिसिद्धेर्न तत्राभिधानशक्तिकल्पनावसरः। किं च गोशब्दमुच्चरिते व्यक्तिषु संशयो भवति न
चिन्निर्णयः। यत्र संशयो न तस्याः शब्दाभिधेयतां शब्दस्य निश्चयजनकत्वात् सामान्यं तु निर्णीयते इति तदेवाभि
धेयं। न च सत्यपि व्यक्तिविशेषनिर्णये व्यक्तिमात्रं निर्णीयत एव। किं पुनरिदं व्यक्तिमात्रं सामान्यं विशेषो वा। आद्या
कारे वहि वस्तुबुद्धिर्व्यावृत्त्यनुगतरूपा तत्र विलक्षणबुद्ध्यवलम्बनं व्यक्तिः समानबुद्ध्यवलम्बनं सामान्यं।
न तदुभयातिरिक्तं व्यक्तिमात्रं नाम किंचिदस्ति वस्तुस्वरूपं सामान्यमेव त्वनेन मात्रशब्देनाभिधीयत इति त
देवाभिधेयं प्रथमं च सामान्यमेव शब्दाद्गम्यते। पश्चाद्व्यक्तिष्वाकांक्षामात्रं जायते तत्र सदेवाभिधेयं न व्य
क्तिविशेषः। विचित्राश्च खण्डमुण्डादिरूपा व्यक्तयः युक्ति विचित्रा गोशब्दोच्चारणे बुद्धिः स्यात्। एकाकारा
त्तूत्पद्यते। अतोभिधेया जातिः। अन्वयव्यतिरेकाभ्यां चैवमेव युक्तं। व्यवहारांगतायां च जातेर्व्यतिरेकादुप
पद्यते। न हि जातिर्नाम व्यक्तेर्व्यतिरिक्ता किमप्यस्ति अपि तु वस्तुन एवैकानुगमात्मकं सादृश्यानुगमरूपतया
बुध्यते। तत्र सामान्यं शब्दार्थ इत्ययमर्थः सामान्यात्मना वस्तु शब्दाद्गम्यते न विशेषात्मनेति। यत्तु सामान्यात्म